अनुवाद—अर्हत् महाविर (महावीर) को नमस्कार हो। वर्ष ९३, वर्षाऋतुका ··· (महीना), ··· के शिष्य गणी नन्दीके आदेशसे [अर्हत् की] पूजाके लिये, हैरण्यक (सुनार) देवकी पुत्री···ने भगवान् वर्द्धमानकी प्रतिमाकी प्रतिष्ठा कराई।

[El, II, n° XIV, n° 23]

६८

मथुरा—प्राकृत।

[वर्ष ९५]

१. [ि] सद्धं सं. ९० ५ [?] ग्रि २ दि १० ८ कोट्टि [य] । तो गणातो ठानियातो कुलातो वइर [ा तो शा] खातो अर्य्य **अरहं**····

२. शिशिनि **धाम [था]** ये निर्वर्तन [ा] **ग्रहदत्तस्य** धि [तु] **धनहथि**·····

अनुवाद—सिद्धि हो। ९५ वें (?) वर्षके ग्रीष्मऋतुके दूसरे महीनेके १८ वें दिन, धामथाके आदेशसे ग्रहदत्तकी पुत्री, धनहथि (धनहस्ती) की पत्नी ··· का [दान किया गया]। धामथा कोट्टियगण, ठानिय कुल, वइरा शाखाके अर्य्य अरह [दिन्न] की शिष्या थी।

[El, 1, n° XLIII, n° 22]

६९

मथुरा—प्राकृत।

[वासुदेव सं० ९८]

१. सिद्ध [म्] ॥ नमो अरहतो महावीरस्य दे·····रस्य। राज वासुदेवस्य संवत्सरे ९० ८ वर्ष-मासे ४ दिवसे १०१ एतस्या

२. पुर्वाये अर्य्य-देहिकियातो ग [णातो] परिधा [ि] सिकातो कुलातो पेतपुत्रिकातो शाखातो गणिस्य अर्य्य-देवदत्तस्य न

३. र्य्य—क्षेमस्य

४. प्रकगिरिणं

५. किहदिये प्रज

६.····तस्य प्रवरकस्य धितु वरुणस्य गन्धिकस्य वधूये मित्रस····
·····दत्त गा [?]

७. ये····भगवतो महा [वीर] स्य।

अनुवाद—सिद्धि हो। महावीर अर्हत्को नमस्कार हो। ··· राजा वासुदेवके ९८ वें वर्षकी वर्षाऋतुके चतुर्थ महीनेके ११ वें दिन, अर्य्य देहिकिय (देहिकीय) गण, परिधासिक कुल, प्रेतपुत्रिका (पैतापुत्रिका ?) शाखाके गणि आर्य देवदत्तके ··· [आदेशसे] प्रवरककी पुत्री, गन्धिक वरुणकी बहू, मित्रस ··· ···, आर्य-क्षेमाका ··· ··· [दान] ··· ··· भगवान् महावीरको नमस्कार हो।

[1A, XXXIII, p. 108–109, n° 23]

७०

मथुरा—प्राकृत—भग्न।

[सं.] वर्ष ९८

स. ९० ८ हे १ दि ५ अस्म क्षुणे को [ो]ट्टियात[ो] गणातो उचनग·····[1]

---

१ 'उचनगरितो शाखातो'।

अनुवाद—वर्ष ९८ की शीतऋतुके १ ले महीनेके ५ वें दिन, कोट्टिय गण, उचनगरी (उच्चानागरी) [शाखा] .....

[El, II, n° XIV, n° 24]

७१

मथुरा—प्राकृत ।

[विना कालनिर्देशका]

१. नमो अरहंतानं **सिहक**स वानिकस पुत्रेण **कोशिकि**पुत्रेण

२. **सिहनादिके**न आयागपटो प्रतिथापितो आरहंतपुजाये [॥]

अनुवाद—अर्हन्तोंको नमस्कार हो। वानिक सिहक (सिंहक) के पुत्र तथा किसी कोशिकी (कौशिकी माँ) के पुत्र सिहनादिक (सिंह-नन्दिक ?) के द्वारा एक आयागपटकी प्रतिष्ठा अर्हन्तोंकी पूजाके लिये की गई ।

[El, II, n° XIV, n° 30]

७२

मथुरा—प्राकृत—भग्न ।

[विना कालनिर्देशका]

नमो अरहंताना **शिवघो [षक]**स भरि [या]....ना....ना....

अनुवाद—अर्हन्तोंको नमस्कार। शिवघोषककी भार्या.....

[El, II, n° XIV, n° 31]

७३

मथुरा—प्राकृत ।

[विना कालनिर्देशका]

पं. १. नमो अरहंतानं **[मल]**....**ण**स धितु **भद्रयश**स वधुये **भद्रनदि**स भयाये

२. **अ [चला]**ये आ[या]गपटो प्रतिथापितो अरहतपुजाये ।

अनुवाद—अर्हन्तोंको नमस्कार। मल—णकी बेटी, भद्रयश (भद्रयशस) की बहू, तथा भद्रनदि (भद्रनन्दिन्) की पत्नी अचलाने अर्हन्तोंकी पूजाके लिये एक आयागपट स्थापित किया।

[El, II, n° XIV, n° 32]

७४

मथुरा—प्राकृत—भग्न।

[काल लुप्त]

—शे एत [स्यां] पूर्व्वायां **कोट्टिया**तो गणातो·····

अनुवाद—उक्त समय पर, कोट्टियगणके·····

[El, 1, n° XLIII, n° 15]

७५

मथुरा—प्राकृत—भग्न।

[काल लुप्त]

पं. १.·····अरहंतानं वधमानस्य **[क]**लस्य धितु **सिनविषुस्य** भ [स्रि] न [ा] य

२.·····**[श] [ति]** स्य ि[नव] र्तनं [॥]

अनुवाद—शतिके आदेशसे सिनविषु (विष्णुषेण)की बहिन, कलकी पुत्रीका दान यह अर्हत् वर्धमानकी प्रतिमा है।

[El, 1, n° XLIII, n° 16]

७६

मथुरा—प्राकृत—भग्न।

[विना कालनिर्देशका]

वारणातो गणातो आर्य**कनियसिका**तो कुलातो **ओद**·····

अनुवाद—वारण गण, पूजनीय कनियसिक कुल, ओद···(शाखा) के

[El, 1, n° XLIII, n° 23]

७७

मथुरा—प्राकृत—भग्न ।

[काल लुप्त]

.....र्षमासे १ दीवसे ३० अस्मि क्षु.....[1]

अनुवाद—.....वर्षाऋतुके पहले महीनेके ३० वें दिन, उस अवसर (या, उत्सव) पर.....

[El, 1, n° XLIII, n° 25]

७८

मथुरा—प्राकृत—भग्न ।

[विना कालनिर्देशका]

दासस्य पुत्रो **चीरि** तस्य दत्तिः [॥]

अनुवाद—दासके पुत्र चीरिका दान ।

[El, 1, n° XLIII, n° 26]

७९

मथुरा—प्राकृत—भग्न ।

[विना कालनिर्देशका]

पं. १. [प्रतिमा] वधमान [स्य] प्रतिथापिता

२. ....**ठानिया**तो—ल.....त आर्यग].....

अनुवाद—ठानिय (स्थानीय) शाखाके.....वधमान (वर्धमान)-की प्रतिमा प्रतिष्ठापित की गई ।...

[El,I, n° XLIII, n° 27]

---

१ पढ़ो 'वर्षमासे' और 'क्षुणे' ।

८०

मथुरा—प्राकृत—भग्न ।

[विना कालनिर्देशका]

पं. १. [सि] द्ध नमो अरहंताण····द्धनं[1] **वारणे** गणे **अयहाट्टि** [ये][2]

२. कुले **वजनागरि**या शाखाया **.अर्यशिरिकिये** संभो·····[3]

अनुवाद—सिद्धि हो । अर्हन्तोंको नमस्कार । [सिद्धोंको नमस्कार] । वारण गण, अय हाट्टिय (आर्य हालीय)कुल, वजनागरि (वज्रनागरी) शाखा, अर्य-शिरिकिय संभोगके·····

[El, 1, XLIV, n° 34]

८१

मथुरा—प्राकृत ।

[विना कालनिर्देशका]

पं. १. **[ते]–रुसनंदिक**स पुत्रेन **नंदिघोषेन** [ते] वणिकेन अ···· त····अले·····

२. णानं मंदिरे [आ] यागपटा प्रतिथापित [ा]·····

अनुवाद—ते-रुस (?)-नंदिकके पुत्र, तेवणिक (त्रैवर्णिक) नंदिघोषके द्वारा आयागपट ·····के मन्दिरमें स्थापित की गई ।

[El, 1, XLIV, n° 35]

८२

मथुरा—प्राकृत ।

[विना कालनिर्देशका]

अ. ··· भगवतो उसभस **वारणे** गणे **नाडिके** कुले ···· ···· खा [यं] ····

---

१ पढ़ो 'नमो सिद्धान' । २ संभवतः 'होळिये' । ३ पढ़ो 'संभोगे' ।

ब. दुक्कस वायकस सिसिनिए **सादिताए** नि ····

अनुवाद—भगवान् वृषभ (उसभ) को नमस्कार हो। वारण गण, नाडिक कुल तथा·····के वाचक·····दुककी शिष्या सादिताके आदेशसे·····

[El, II, n° XIV, n° 28]

८३

मथुरा—प्राकृत।

[विना कालनिर्देशका]

स्थ [ा]निकिये कुले गनिस्य **उग्गहिनिय** शिषो वाचको **घोषको** आर्हतो पर्श्वस्य प्रतिमा····

अनुवाद—"स्थानिकिय (कीय) कुलके गणि (गणिन्) उग्गहिनिके शिष्य वाचक घोषकने एक अर्हत् पार्श्वकी प्रतिमा···

[El, II, n° XIV, n° 29]

८४

मथुरा—प्राकृत—भग्न।

[विना कालनिर्देशका]

अ. वर्धमानपटिमा **वजरनद्यस्य** धिता **वाधिंशिव**···

१.—ि— स्य— कुटीबिनि **दिनाये** दाति **बडिम [शि]** ये····

२.·····

अनुवाद—"वजरनद्य (वज्रनन्दिन्) की पुत्री, वाधिशिव (वृद्धिशिव ?) की बहू, ि ··· की पत्नी दिना (दत्ता) के दानके रूपमें एक वर्धमानकी प्रतिमा ··· ··· बडिमशिके·····

[El, II, n° XIV, n° 33]

८५

मथुरा—प्राकृत—भग्न।
[विना कालनिर्देशका]

अ. तिये निर्वर्तना

ब. १. तो शखतो **शिरिक**तो संभोकतो अर्य्य

२. .... लनस्य मतु हि [स्त].....

२. ि—धराये निवतना **शिवद [त]**

[El, II, n° XIV, n° 35]

[नोट—'निर्वर्तना' और 'निवतना' इन दो शब्दोंके एक ही शिलालेखमें आ जानेसे एक ही शिलालेखके दो खण्ड मालूम पड़ते हैं और वे सम्बद्ध अर्थ-को व्यक्त नहीं करते हैं।]

८६

मथुरा—प्राकृत।
(विना कालनिर्देशका)

१.....ये **मोगलि**पुतस **पुफक**स भयाये

२. **असा**ये पसादो

अनुवाद—किसी मोगली (माँ मौद्गलीविशेष) के पुत्र, पुफक (पुष्पक) की पत्नी, असा (अश्वा ?) का दान।

[1A, XXXIII, p. 151, n° 28.]

८७

राजगिरि—संस्कृत।

[ ]

T. Bloch के आर्कीओलोजिकल सर्वे, बङ्गाल सार्किल, वार्षिक रिपोर्ट १९०२, पृ० १६, विश्लेषणमें इस शिलालेखका उल्लेख है। मूलका पता नहीं है।

[AS, Bengal circle, Annual report 1902, p. 16. a.]

८८

मथुरा—संस्कृत—भग्न।

[सं० २९९]

१. नमस्-सर्वसिद्धाना अरहन्तांना । महाराजस्य · राजातिराजस्य संवच्छरशते द [ु] [तिये नव (?) -नवत्यधिके ।]

२. २०० ९० ९ (?) हेमन्तमासे २ दिवसे १ आरहातो महावीरस्य प्रातिमा

३.····स्य **ओखारिकाये** धितु **उज्झतिकाये** च **ओखाये** श्राविका भगिनिय [ ]·····

४.·····**शरिकस्य शिवदिनास्य** च एतैः आराहातायतने स्थापित [।]·····

५.·····देवकुलं च ।

अनुवाद-सब सिद्धों और अर्हन्तोंको नमस्कार हो। महाराज और राजातिराजके (९९ से अधिक) दूसरी शताब्दिमें, २९९ (?), शीतऋतुके दूसरे महीनेके पहले दिन—भगवान महावीरकी प्रतिमा अर्हन्मन्दिरमें ····· के द्वारा तथा·····की पुत्री,···ओखरिकाकी···उज्झतिका द्वारा, ···श्राविका-भगिनी ओखाके द्वारा, तथा शिरिक और शिवदिन्ना इनके द्वारा स्थापित की गई···साथमें एक जिनमन्दिर भी।

[G. Buhler, J R A S, 1896, p. 578-581.]

८९

मथुरा—संस्कृत – भग्न

[गुप्तकाल? वर्ष ५७]

संवत्सरे सप्तपञ्चाश ५० ७ हेमन्धत्रिती····[1]

—सि [दि] वसे त्रयोदशे अ-पूर्व्वायां····

---

१ 'हेमन्त' और 'तृतीय' या 'तृतीये' पढ़ो।

अनुवाद—५७ वें वर्ष, शीतऋतुकी तीसरे महीनेके १३ वें दिन, इसदिन.....

[El, II, n° XIV, n° 38]

९०

नोणमङ्गल—संस्कृत

गुप्तकालसे पहिले, संभवतः ३७० ई० का

[नोणमंगलमें ताम्र-पट्टिकाओंपर]

[१ ब] स्वस्ति नमस् सर्वज्ञाय ॥ जितं भगवता गत-घन-गगनाभेन पद्मनाभेन श्रीमज्-जाह्नवेय-कुलामल-व्योमावभासन-भास्करस्य स्व-भुज-जवज-जय-जनित-सुजन-जनपदस्य दारुणारिगण-विदारण-रणोपलब्ध-व्रण-विभूषण-भूषितस्य काण्वायनसगोत्रस्य श्रीमत्**कोङ्गुणिवर्म-धर्म-महाधिराजस्य** पुत्रस्य पितुरन्वागत-गुण-युक्तस्य विद्या-विनय-विहित-वृत्तस्य

[२ अ] सम्यक्-प्रजा-पालन-मात्राधिगत-राज्य-प्रयोजनस्य विद्वत्कवि-काञ्चन-निकषोपल-भूतस्य विशेषतोऽप्यनवशेषस्य नीति-शास्त्रस्य वक्तृ-प्रयोक्तृकुशलस्य सुविभक्त-भक्त-भृत्यजनस्य **दत्तक-सूत्र-वृत्ति-प्रणेतुः** श्रीमन्**माधववर्म-धर्म-महाधिराजस्य** पुत्रस्य पितृ-पैतामह-गुणयुक्तस्य अनेक-चतुर्दन्त-युद्धावाप्त-चतुरुदधि-सलिलास्वादित-यशसः समद-द्विर-दतुरगारोहणातिशयोत्पन्न-कर्म्मणः श्रीमद् **हरिवर्म्म-महाधिराजस्य** पुत्रस्य गुरु-गो-ब्राह्मण-पूजकस्य नारायण-चरणानुध्या

[२ ब] तस्य श्रीम**द्विष्णुगोप-महाधिराज**स्य पुत्रेण पितुरन्वागत-गुण-युक्तेन त्र्यम्बकचरणाम्भोरुहराजः(ज)पवित्रीकृतोत्तमाङ्गेन व्यायामो-द्वृत्त-पीन-कठिनभुजद्वयेन स्व-भुज-बल-पराक्रम-क्रय-क्रीत-राज्येन क्षुत्-

क्षामोष्ठ-पिसिताशनप्रीतिकर-निसित-धारासिना श्रीमता **माधववर्म्म-महाधिराजेन** आत्मनःश्रेयसे प्रवर्द्धमानविपुलैश्वर्य्ये त्रयोदशे संवत्सरे फाल्गुने मासे शुक्ल-पक्षे तिथौ पञ्चम्यां श्रीमद्-वीर-देव-शासनाम्बरावभासन-सहस्रकरस्य आचार्य्य**वीर-देवस्य**

[३ अ] निज-कृतान्तपर-राद्धान्त-प्रवीणस्य उपदेशनात् **मुदुकोत्तूर**-विषये **पेब्बोलल्**-ग्रामे अर्हदायतनाय मूलसंघानुष्ठिताय महा-तटाकस्य अधस्तात् द्वादश-खण्डुकावापमात्र-क्षेत्रं च तोट्ट-क्षेत्रं च पट्टु-क्षेत्रं च **कुमारपुर**-ग्रामश्च एतत्सर्वं स-सर्व्व-परिहार-क्रमेणाद्भिर्द्दत्तः योऽस्य लोभात् प्रमादाद्वापि हर्त्ता स पञ्च-महा-पातक-संयुक्तो भवति अपि चात्र मनुगीता[:] श्लोका[:]

स्व-दत्तां पर-दत्तां वा यो हरेत वसुन्धराम् ।
षष्टि-वर्ष-सहस्राणि घोरे तमसि वर्तते ॥

(अन्य हमेशाके अन्तिम श्लोक)

[इस लेखमें गंगकुलके राजाओंकी परम्परा—कोङ्गणिवर्मा, माधववर्मा, हरिवर्मा, विष्णुगोप और माधववर्मा—देकर यह बताया है कि अन्तिम राजाने अपने राज्यके १३ वें वर्षमें, फाल्गुनसुदी पंचमीको, आचार्य वीरदेवकी सम्मतिसे, मुदुकोत्तूर-देशके पेब्बोवल् गांवमें मूलसंघद्वारा प्रतिष्ठापित जिनालयमें (उक्त) भूमि और कुमारपुर गांव दानमें दिये।]

[EC, X, Malur tl., n° 73.]

९१

उदयगिरि (सांची के निकट)–संस्कृत ।

[गुप्तकाल १०६= ई. सं० ४२६]

Corrected transcript of the facsimile.

[१] नमः सिद्धेभ्यः[॥]

श्रीसंयुतानां गुणतोयधीनाम्
गुप्तान्वयानां नृपसत्तमानाम् [।]

[२] राज्ये कुलस्याभिविवर्द्धमाने
षड्भिर्य्युते वर्षशतेऽथ मासे [॥] १.
सुकार्त्तिके बहुलदिनेऽथ पञ्चमे

[३] गुहामुखे स्फुटविकटोत्कटामिमां [।]
जितद्विषो जिनवरपार्श्वसंज्ञिकाम्
जिनाकृतीं शमदमवान

[४] चीकरत् [॥] २. आचार्य-भद्रान्वयभूषणस्य
शिष्यो ह्यसावार्य्यकुलोद्गतस्य [।]
आचार्य-गोश

[५]र्म्म मुनेस्सुतस्तु पद्मावत [स्या]श्वपतेर्भटस्य [॥] ३.
परैरजेयस्य रिपुघ्नमानिनम्
स सङ्घ

[६] लस्येत्यभिविश्रुतो भुवि [।] स्वसंज्ञया शंकरनामशङ्कितो
विधानयुक्तं यतिमार्ग्गमास्थितः [॥] ४.
स उत्तराणां सदृशे गुरूणां
उदग्दिशादेशवरे प्रसूतः [।]

[८] क्षयाय कर्म्मारिगणस्य धीमान्
यदत्र पुण्यं तदपाससर्ज्ज [॥] ५.

[इस शिलालेखमें शम-दमवाले किसी व्यक्तिकेद्वारा पार्श्वनाथ जिनेन्द्रकी प्रतिमाकी कार्त्तिक वदी पंचमीके दिन स्थापनाकी बात है। यह प्रतिमा किसी गुफाके द्वारपर खड़ी की गई थी। इस प्रतिमाकी स्थापना करने वाला या उसको खड़ा करनेवाला आचार्य गोशर्माका शिष्य था। ये गोशर्मा आचार्य भद्रके वंशमें हुए थे, इनकी परम्परा आर्यकुलकी थी और अश्वपति योद्धाके लड़के थे। ये अश्वपति सङ्कल (या सिंहल) के नामसे प्रसिद्ध थे और इन्होंने जिनदीक्षा लेनेके बाद अपना नाम शंकर रक्खा था।]

[इण्डियन एण्टीक्वेरी, जिल्द ११, पृ० ३१०]

९२

मथुरा—संस्कृत।

[गुप्तकाल, वर्ष ११३]

१. सिद्धम् । परमभट्टारकमाहाराजाधिराज **श्रीकुमारगुप्तस्य** विजयराज्यसं [१०० १०] ३ क·····न्तमा····[दि]—स २० अस्यां ५ [पूर्व्वायां] कोट्टिया गणा-

२. द्विद्याधरी [तो] शाखातो **दतिलाचार्य्य**प्रज्ञपिताये **शामाढ्याये** भट्टिभवस्य धीतु ग्रहमित्रपालि [त] प्रा [ता] रिकस्य कुटुम्बिनीये प्रतिमा प्रतिष्ठापिता।

अनुवाद—सिद्धि हो। परमभट्टारक महाराजाधिराज श्रीकुमारगुप्तके विजयराज्यके ११३ वें वर्षमें, [शीतऋतु महीने] कार्त्तिकके २० वें दिन, कोट्टियगण (तथा) विद्याधरी शाखाके **दतिलाचार्य** (दत्तिलाचार्य) की आज्ञासे **शामाढ्य** (श्यामाढ्य) ने एक प्रतिमाकी प्रतिष्ठा करवाई। श्यामाढ्य भट्टिभवकी बेटी (और) ग्रहमित्रपालित प्रातारिक (घाटी या नाविक) की पत्नी थी।

[EI, II, n° XIV, n° 39]

९३

कहायूँ—संस्कृत

[गुप्तकाल १४१ वां वर्ष=४६१ ई. स.]

सिद्धम् ।

[१] यस्योपस्थानभूमिर्नृपतिशतशिरःपातवातावधूता
[२] गुप्तानां वंशजस्य प्रविसृतयशसस्तस्य सर्व्वोत्तमर्द्धेः
[३] राज्ये शक्रोपमस्य क्षितिपशतपतेः **स्कन्दगुप्तस्य** शान्ते
[४] वर्षे त्रिंशद्दशैकोत्तरकशततमे ज्येष्ठमासि प्रपन्ने ॥ १ ॥
[५] ख्यातेऽस्मिन् ग्रामरत्ने **ककुभ** इति जनैस्साधुसंसर्गपूते
[६] पुत्रो यस्**सोमिलस्य** प्रचुरगुणनिधेर्**भद्रिसोमो** महात्मा
[७] तत्सूनू**रुद्रसोम[:]** प्रथुलमतियशा **व्याघ्र** इत्यन्यसंज्ञो
[८] **मद्र**स्तस्यात्मजोऽभूद् द्विजगुरुयतिषु प्रायशः प्रीतिमान् यः ॥
[९] पुण्यस्कन्धं स चक्रे जगदिदमखिलं संसरद्वीक्ष्य भीतो
[१०] श्रेयोऽर्थं भूतभूत्यै पथि नियमवतामर्हतामादिकर्तॄन्
[११] पञ्चेन्द्रांस्थापयित्वा धरणिधरमयान् सन्निखातस्ततोऽयम्
[१२] शैलस्तम्भः सुचारुर्गिरिवरशिखराग्रोपमः कीर्त्तिकर्त्ता ॥ ३ ॥

[इस शिलालेखमें, जो कि गुप्तकालके १४१ वें वर्षका है, बताया गया है कि किसी भद्र नामके व्यक्तिने, जिसकी कि वंशावली यहां उसके प्रपितामह सोमिल तक गिनाई है, अर्हन्तों (तीर्थंकरों)में मुख्य समझे जाने वाले, अर्थात् आदिनाथ, शान्तिनाथ, नेमिनाथ, पार्श्व, और महावीर, इन पांचोंकी प्रतिमाओंकी स्थापना करके इस स्तम्भको खड़ा किया। लेखकी ११ वीं पंक्तिके 'पञ्चेन्द्रान्' से इन्हीं पांच तीर्थङ्करोंसे मतलब है।]

[इण्डियन एण्टिक्वेरी, जिल्द १०, पृ० १२५–१२६]

९४

नोणमंगल—संस्कृत तथा कन्नड़ ।

[गुप्तकालसे पहिले, संभवतः ४२५ (?) ई० का]

[नोणमंगल (लक्कूर परगना) में, ध्वस्त जैन बस्तिके ताम्र-पत्रों पर[1]]

(१ ब) स्वस्ति जितं भगवता गतघन-गगनाभेन पद्मनाभेन श्रीमज् **जाह्नवेय**-कुलामल-व्योमावभासन-भास्करस्य स्व-भुज-जव-ज-जय-जनित-सुजन-जनपदस्य दारुणारि-गण-विदारण-रणोपलब्ध-व्रण-विभूषण-भूषितस्य काण्वायनस-गोत्रस्य श्रीमत्**कोङ्गणिवर्म्म-धर्म्म-महाधिराज**स्य पुत्रस्य पितुरन्वागत-गुण-युक्तस्य विद्या-विनयविहित-वृत्तस्य सम्यक्-प्रजा-पालन-मात्राधिगत-राज्य-प्रयोजनस्य विद्वत्-कवि-काञ्चन-निकषो

[२ अ] पल-भूतस्य विशेष्यतोऽप्यनवशेषस्य नीति-शास्त्रस्य वक्तृ-प्रयोक्तृकुशलस्य सुविभक्त-भक्त-भृत्य-जनस्य दत्तक-सूत्र-वृत्ति-प्रणेतुः श्रीम**न्माधववर्म्म**-धर्म्म-महाधिराजस्य पुत्रस्य पितृ-पैतामह-गुण-युक्तस्य अनेक-चतुर्दन्त-युद्धावाप्त-चतुरुदधि-सलिलास्वादित-यशसः समद-द्विरद-तुरगारोहणातिशयोत्पन्न-कर्म्मणः धनुरभियोगस-म्पद्-विशेषस्य श्रीमद्-**हरिवर्म्म**-महाधिराजस्य पुत्रस्य गुरु-गो-ब्राह्मण-पूजकस्य नारायण-चरणानुध्यातस्य श्रीम**द्विष्णुगोप**-महाधिराजस्य पुत्रस्य पितुरन्वा

[२ ब] गत-गुण-युक्तस्य त्र्यम्बक-चरणाम्भोरुह-रजः-पवि-त्रीकृतोत्तमाङ्गस्य व्यायामोद्वृत्त-पीन-कठिन-भुज-द्वयस्य स्वभुजबल-परा-

---

१ ये ताम्रपत्र जमीनमें मिले हैं ।

क्रम-क्रयक्रीत-राज्यस्य चिर-प्रनष्ट-देव-भोग-ब्रह्मदेय-नैक-सहस्र-विसर्ग्गा-ग्रयण-कारिणः क्षुत्-क्षामोष्ट-पिसिताशन-प्रीतिकर-निशित-धारासेः कलि-युग-बलावमग्न-धर्म्मोद्धरण-नित्य-सन्नद्धस्य श्रीमतो **माधववर्म्म**-धर्म्म-महा-धिराजस्य पुत्रेण जननी-देवताङ्क-पर्य्यङ्क-तले-समधिगत-राज्य-विभव-विलासेन निज-प्रभावांशु-चक्रवालाखण्डित-शत्रु-नृपति-मण्डलेनाखण्ड

[३ अ] ल-विडम्बि-शौर्य्य-वीर्य्य-यशो-धाम-भूतेन गज-धुरि-हय-पृष्ठ कार्म्मुके चाद्वितीयेन ललना-नयन-भ्रमरावली-नित्यकृतानुयात्रेण प्रजा-परिपालन-कृत-परिकर-बन्धेन किं बहुना इदङ्कलि-युधिष्ठिरेण-श्रीमता **कोङ्गुणिवर्म्म**-धर्म्म-महाधिराजेन आत्मनः श्रेयसे प्रवर्द्धमान-विपुलैश्वर्य्ये प्रथमसंवत्सरे फाल्गुन-मासे शुक्ल-पक्षे तिथौ पञ्चम्यां सो(स्वो)पाध्यायस्य परमार्हतस्य **विजयकीर्तेः** सकलदिङ्मण्डलव्यापिकीर्त्तेरुपदेशतः **चन्द्रनन्द्या**चार्य्य-प्रमुखेन मूल-संघेनानुष्ठिताय **उरनूरार्हतायत**

[३ब] **नाय कोरिकुन्द**-विषये **वेन्नैल्करनि**ग्रामः **पेरूरेवानि-अडि गल**र्हदायतनाय शुल्क-बहिश्कर्षापणेषु पादश्च देव-भोगक्रमेणाद्विर्द्दत्तः योऽस्य लोभाद् प्रमादाद्वापि हर्त्ता स पञ्च-महा-पातक-संयुक्तो भवति अपि चात्र मनुगीताः श्लोकाः

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टि-वर्ष-सहस्राणि घोरे तमसि वर्त्तते
भूमि-दानात् परं दानं न भूतं न भविष्यति ।
तस्यैव

[४ अ] हरणात् पापं न भूतं न भविष्यति ॥

(दो हमेशाके श्लोक)महाराज-मुखाज्ञाप्या **मारिषेण** त्वट्टकारेण लिखितेयं ताम्र-पट्टिका

[EC, X, Mālur tl., n° 72.]

अनुवाद—कोङ्गणिवर्म्म-धर्म्म-महाधिराज जाह्नवी (या गंग)-कुलके निर्मल आकाशमें चमकनेवाले सूर्य थे; वे काण्वायनसगोत्रके थे।

इनके पुत्र **माधववर्मधर्ममहाधिराज** थे, जो एक 'दत्तकसूत्र-वृत्ति' के प्रणेता थे।

इनके पुत्र **हरिवर्मा**-महाधिराज थे।

इनके पुत्र **विष्णुगोप**-महाधिराज थे।

इनके पुत्र **माधववर्म**-धर्म-महाधिराज थे, जो कलियुगकी कीचड़में फंसे हुए धर्मरूपी बैलको निकालनेमें हमेशा सन्नद्ध रहते थे।

इनके पुत्र कोङ्गणिवर्म-धर्म्म-महाधिराजने जो कि कलियुगी युधिष्ठिर कहलाते थे, अपने कल्याणकेलिये, अपने बढ़ते हुए राज्यके प्रथम वर्षकी फाल्गुन सुदी पञ्चमीको, अपने उपाध्याय परमार्हत (भक्तजैन) विजयकीर्तिकी सम्मतिसे, मूलसंघके चन्द्रनन्दि इत्यादिके द्वारा प्रतिष्ठापित उरनूर के जैन मन्दिरको कोरिकुन्द-देशमेंका वेन्नेल्करनि गाँव दिया था, और पेरूर एवानि-अडिगल्के जिनमन्दिरमें बाहरकी चुङ्गीके कार्षापण (या धन) का चतुर्थ भाग दिया था।

हमेशाके शापात्मक (imprecatory) श्लोक। महाराज अपने मुँहसे जैसा बोलते जाते थे, मारिषेण त्वट्टकार वैसा ही इन ताम्र-पट्टिकाओं-पर खोदता जाता था।

---

१. ८० रत्तीके तौलके ताम्बेके सिक्के, जो प्राचीनतम देशी मुद्राके थे। (डा० बूल्हरकी Grundriss, में रैपसनका 'Indian Coins' नामका लेख देखो।)

९५

मर्कर—संस्कृत तथा कन्नड़।

[शक ३८८=४६६ ई.]

अविनीत कोङ्गणिका मर्कर-पत्र

(मर्कराके खजानेमेंसे प्राप्त ताम्रपत्रोंके ऊपर)

(१ ब) स्वस्ति जितं भगवता गतघनगगनाभेन पद्मा(द्म)नाभेन श्रीमद्जाह्नवीय[कु]लामलव्योमावभासनभास्करः स्वखड्गैकप्रहारखण्डित-महाशिलास्तम्भलब्धबलपराक्रमो दारणो(रुणा)रिगणविदारणोपलब्धव्र(व्र)-णविभूषणविभूषित **काण्वायन**सगोत्रस्य(?) श्रीमान् **कोङ्गणि**महाधिराज ॥ तत्पुत्र पितुरन्वागतगुणयुक्तो विद्याविने(न)यविहितवृत्तः सम्या(म्य)क्प्र-जापालना(न)मात्राधिगतराज्यात्प्र(ज्यप्र)योजन विद्वत्कविकाञ्चननिक-षोपलभूतो नीतिशास्त्रस्यवक्तृप्रयोक्तृकुशलस्य(?) दत्तकसूत्रवृत्तिः(त्तेः) प्रणेतां(ता) श्रीमा**न्माधव**महाधिराज ॥ तत्पुत्र पितृपैतामहा(ह)गुणयुक्तो व(ऽ)नेकचातुर्द्दन्तयुद्ध(द्धा)वाप्तिचतुरुदधिसलिलास्वादितयश श्रीमद् **हरि-वर्म्म**महाधिराज ॥ तत्पुत्र ॥ द्विजगुरुदेवताः(ता)पूजनपरो नारायण-चरणानुद्ध(ध्या)त श्रीम**द्विष्णुगोप**म

(२ अ) हाधिराज ॥ तस्य पुत्र ॥ त्रियम्भ(त्र्यम्ब)कचरणाम्भोरुहरा-जाः(रजः)पवित्रीकृतोत्तमाङ्ग स्वभुजबलपराक्रमक्रियाकृतराज्य कलियुगबल-पङ्कावसन्नवृषोद्धरणनित्यसन्नद्ध श्रीमा**न्माधव**महाधिराज ॥ तस्य पुत्र ॥ श्रीमद्**कदम्ब**कुलगगनगभस्तिमालिन **कृष्णवर्म्म**महाधिराजस्य प्रिया(य) भागिनेयो विद्याविनय(या)तिस(श)यपरिपूरितान्तरात्म(त्मा) निरवग्रहप्रथा-(य)नसौर्य्य विद्वत्सु प्रथमगण्य श्रीमान् **कोङ्गणि**महाधिराज **अविनीत**ना-मधेय दत्तस्य **देसिग**-गणं **कोण्डकुन्दा**न्वय**गुणचन्द्र**भटारशिष्यस्य **अभ-**

णन्दि(अभयनन्दि)भटार तस्य शिष्यस्य **शीलभद्र**भटारशिष्यस्य **जयणन्दि**[1]भटारशिष्यस्य **गुणणन्दि**भटारशिष्यस्य **चन्दणंदि**भटारग्गे अष्टा-असीति-उत्तरस्य त्रयो-स(श)तस्य संवत्सरस्य माघमासं सोमवारं स्वातिनक्षत्र सुद्ध पञ्चमी **अक्कालवर्ष**-पृथुवीवल्लभमन्त्री **तळवननगर** श्रीविजयजिनालयक्के पूनाडुच्छ(च्छट्)सहस्रएडेनाडुसप्तरिमध्ये **बदणेगुप्पे**नाम **अविनीत**महाधिराजेन दत्तेन पडिये आरोळमूरू ।

(२ ब) रोळ् पन्निक्कण्डुगङ्गेय्दु**अम्बलिमण्णं तलवनपुर**दोळ् **तळवित्ति**यमन् **पोगरिगेल्ले**योळ् पन्निक्कण्डुगं **पिरिकेरे**योळम् राजमानमनुमोदन पन्निक्कण्डुगं मनोहरं दत्तं **बदणेगुप्पे**ग्रामस्य सीमान्तरं पूर्व्वस्यां दिसि केञ्जिगेमोर्रडिए गजसेलेये करिवल्लिय कोट्टगर**बदणेगुप्पे**यत्रिसन्धिय सत्ति-कोर्रडु आग्नेयदिनन्ते बन्दुकागणि-तटाकं· पुन दक्षिणस्यां दिसि बहुष्णुहिये बल्कणिवृक्षमे पुन पश्चिम-मुखदे सन्द बहुमूलिकपन्तिये पुन **बदणेगुप्पे**य-कोट्टगरमुल्तगिय-त्रिसन्धिय कोळे चण्डिगाले पुन नैरत्यदे सन्दु कथक-वृक्षमे पुन पश्चिमस्यां दिसि पेल्डुल्लिदल्-वृक्षमे सान्तेरेंतिय वट-वृक्षमे पुन तोरेवल्लमे उत्तरा-मुखदे सन्द बहुमूलिक-पन्तिये जम्बूपडिय-तटाकमे पुन वायव्यदे गळेचिञ्च-वृक्षमे पुन **बदणेगुप्पे**य-मुल्तगिय-कोळेयनूरदासनूर्-त्रिसन्धिय-नेर्गिल-गुम्बे निडुवेळुङ्गे पुन गजसेलेयग्राम उत्तरदिसि कायामोर्रडिए इल्लिदु केम्ब रेये पुन पूर्ब्ब-मुखदे सन्द बहुमूलिक-प ।

(३ अ)न्तिये पुन कडपल्तिगाल वट-वृक्षमे पुन ईसानदे **बदणेगुप्पे**य-दासनूर-पोल्मद-त्रिसन्धिय तटाकमे कोडिगट्टि चिञ्च-वृक्षमे केन्तर्रम्बिन दिणेइं पूर्ब्बदे कूडित्त सीमान्तरं ॥ तस्य साक्षिणा गङ्गराज

---

१ °जनाणन्दि°, इं ए०, १, पृ० ३६३ ।

कुलसकलास्थयिक-पुरुष पेर्ब्बक्कवाण मरुगरेय सेन्दिक गञ्जेनाड निर्ग्गुण्ड मणियुगुरेय नन्द्याल सिम्बालादय भृत्ययां देश-साक्षि तगडूर कुळुगो वरुगणिगनूर तगडरु आलगोडते नन्दकरुं उम्मत्तूर बेल्लुररुमाळ-गेयरुं **बदणेगुप्पेय** झंसन्द बेल्लुररु पेर्ग्गिवियरुं ॥

स्वदत्तपरदत्तां वा यो हरेथ(त) वसुन्धरी(रां) षष्टिं वर्षसहस्राणि विष्टायां जायते कृमि[:] [॥]

वसुभि[र्] वसुधा भुक्तां(क्ता)राजभिस्सक-राजभिः[1] यस्य यस्य यदा भूमि तस्य तस्य तदा फलम् ॥

देवस्वं तु विषं घोरं न विषं विषमुच्यते । विषमेकाकिनं हन्ति देवस्व[÷] पुत्रपौत्रिकं(कां) ॥

सामान्योयं धर्म्म हेतुं(सेतुं) नृपाणाम् काले काले पालनीयो भवद्भि[:] सर्ब्बा(र्व्वा)नेतां भागिन(न् भाविनः) पार्त्थिवेन्द्रान् भूयो भूयो याचते रामभद्र[:] ॥ विश्वकर्म्म लिखितम्

चेर राजाओंकी वंशावली इस दानपत्रमें इस प्रकार दी हुई है:—

१. कोङ्गणि प्रथम । २. माधव प्रथम । ३. हरिवर्म्म । ४. विष्णु-गोप । ५. माधव द्वितीय । ६. कोङ्गणि द्वितीय (अविनीत) ।

ये अविनीत महाधिराज कदम्बकुलसूर्य कृष्णवर्म्म-महाधिराजकी प्रिय बहिनके पुत्र थे । इनके लिये दानपत्रमें कहा गया है कि—'इनका अन्तरात्मा विद्या, विनयकी वृद्धिसे परिपूरित था, अजेय शौर्य इनमें था और विद्वानोंमें प्रथम गिने जाते थे ।' इन्हींसे देसिग (देशीय) 'गण' कोण्डकुन्द 'अन्वय' के गुणचन्द्र-भटारके शिष्य अभयनन्दि-भटार, उनके शिष्य शीलभद्र-भटार, उनके शिष्य जयणन्दि- भटार, उनके शिष्य गुणणन्दि-भटार, उनके शिष्य चन्दणन्दि-भटारको तलवननगरके श्रीविजय जिनालयके मन्दिरके लिये

---

१ सामान्यतया 'सगरादिभिः' ।

बदणेगुप्पे नामका सुन्दर गाँव दानमें प्राप्तकर अकालवर्ष पृथवी-वल्लभके मन्त्रीने शकसंवत्सर ३८८ के माघ महीनेकी शुक्ल पञ्चमी, सोमवारको स्वातिनक्षत्रके समय इसे भेंट किया । यह गाँव पूनाडु छः हजारके एडेनाडु सत्तरके मध्यमें अवस्थित है । साथमें १२ 'कण्डुग' प्रत्येक छः आश्रित गांवोंमेंसे, तथा पोगरिगेल्ले और पिरिकेरेमें से भी दिया ।]

९६

हल्सी (ज़िला बेलगाँव)—संस्कृत ।
[ई० पाँचवीं शताब्दिका (फ्लीट)]

प्रथम पत्र ।

[१] नमः ॥ जयति भगवाञ्जिनेन्द्रो गुणरुन्द्रः प्र[थि]त [परम] कारुणिकः

[२] त्रैलोक्याश्वासकरी दयापताकोच्छ्रिता यस्य ॥ परम—

[३] श्रीविजय**पलाशिका**यां प्रजासाधारणा [शा] नाम् ॥

दूसरा पत्र; पहली ओर ।

[४] कदम्बानां युवराजः श्री**काकुस्थवर्म्मा** स्ववैजयिके अशीतितमे

[५] संवत्सरे भगवतामर्हताम् सर्व्वभूतशरण्यानाम् त्रैलोक्य-निस्तार-

[६] काणाम् **खेटग्रामे** बदोवरक्षेत्र [म्] **श्रुतकीर्ति**सेनापतये ॥

दूसरा पत्र; दूसरी ओर ।

[७] आत्मनस्तारणार्त्थं दत्तवा [न्] [॥] तद्यो [हि] न (ना) स्ति स्ववंश्यः [प] रवंश्यो वा

[८] स पञ्चमहापातकसंयुक्तो भवती (ति) [।] यो भिरक्षती (ति) तस्य सत्यर्व्व (सर्व्व, या स्त्यं सर्व्व) गु-

[९] णपुण्यावाप्तिः [॥] अपि चोक्तम् [।] बहुभिर्व्वसुधा दत्ता ॥[1]

[१०] [रा] जभिस्सगरादिभिः यस्य यस्य य[दा]भू]मिः तस्य तस्य तदा फलम् [॥]

[११] स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां षष्टिवर्षसहस्र(स्रा)णी (णि)

[१२] नरके पच्यते तु सः ॥ नमो नमः [॥] ऋषभाय नमः ॥

[इस लेखमें कदम्ब 'युवराज' काकुस्थ (काकुत्स्थ)वर्माके द्वारा श्रुतकीर्त्ति सेनापतिको दिये गये एक क्षेत्र-दानका उल्लेख है । यह दान खेटग्राम नामक गाँवमें किया गया था ।]

[इं० ए०, जिल्द ६, पृ० २२-२४, नं० २०]

९७

देवगिरि (जिला धारवाड़)—संस्कृत ।

—[?]—

सिद्धम् जयत्यर्हन्त्रिलोकेशः सर्वभूतहिते रतः
रागाद्यरिहरोनन्तोनन्तज्ञानदृगीश्वरः

स्वस्ति **विजयवैजयन्त्यां** स्वामिमहासेनमातृगणानुद्ध्यातामिषिक्तानां **मानव्य**सगोत्राणां **हारिती**पुत्राणं(णां) अङ्गिरसां प्रतिकृतस्वाध्यायचर्चकानां सद्धर्म्मसदम्बानां **कदम्बा**नां अनेकजन्मान्तरोपार्जितविपुलपुण्यस्कन्धः आहवार्जितपरमरुचिरदृढ़सत्वः[2] विशुद्धान्वयप्रकृत्यानेकपुरुषपरंपरागते जगत्प्रदीपभूते महत्यदितोदिते काकुस्थान्वये **श्रीशान्तिवर्म्म**तनयः

---

१ यह पूर्ण विरामका चिह्न फजूल है । २ इन पत्रोंमें यह खास बात है कि जहाँ द्वित्वाक्षरोंका इतना अधिक प्रयोग किया गया है वहाँ 'सत्व' और 'तत्व'में 'त' अक्षर द्वित्व नहीं किया गया ।

श्रीमृगेश्वरवर्मा आत्मनः राज्यस्य तृतीये वर्षे पौषसंवत्सरे कार्तिकमासे बहुले पक्षे दशम्यां तिथौ उत्तराभाद्रपदे नक्षत्रे **बृहत्परलूरे** (?) त्रिदशमुकुटपरिघृष्टचारचरणेभ्यः परमार्हद्देवेभ्यः संमार्जनोपलेपनाभ्यर्चनभग्नसंस्कारमहिमार्थं ग्रामापरदिग्विभागसीमाभ्यन्तरे राजमानेन चत्वारिंशन्निवर्त्तनं कृष्णभूमिक्षेत्रं चत्वारि क्षेत्रन्निवर्त्तनं च चैत्यालयस्य बहिः,[1] एकं निवत्तनं पुष्पार्थं देवकुलस्याङ्गनञ्च एकनिवर्त्तनमेव सर्वपरिहारयुक्तं दत्तवान् महाराजः। लोभादधर्माद्वा योस्याभिहर्त्ता स पंचमहापातकसंयुक्तो भवति योस्याभिरक्षिता स तत्पुण्यफलभाग्भवति। उक्तञ्च--

बहुभिर्वसुधा भुक्ता राजभिस्सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां।
षष्टिं वर्षसहस्राणि नरके पच्यते तु सः॥
अद्भिर्दत्तं त्रिभिर्भुक्तं सद्भिश्च परिपालितम्।
एतानि न निवर्तन्ते पूर्वराजकृतानि च॥
स्वं दातुं सुमहच्छक्यं दुःखमन्यार्थपालनं।
दानं वा पालनं वेति दानाच्छ्रेयोनुपालनम्॥

परमधार्मिकेण **दामकीर्ति**भोजकेन लिखितेयं पट्टिका इति सिद्धिरस्तु॥

[इं० ए०, जिल्द ७, पृ० ३५-३७, नं. ३६]

[यह पत्र श्रीशान्तिवर्माके पुत्र महाराज श्री 'मृगेश्वरवर्मा' की तरफसे लिखा गया है, जिसे पत्रमें काकुस्था(त्स्था)न्वयी प्रकट किया है, और इससे ये कदम्बराजा, भारतके सुप्रसिद्ध वंशोंकी दृष्टिसे, सूर्यवंशी अथवा इक्ष्वाकु-

---

१ व्याकरणकी दृष्टिसे यह वाक्य बिलकुल शुद्ध नहीं मालूम होता। २ यह पद्य मिस्टर फ्लीटके शिलालेख नं० ५ में मनुका ठहराया गया है। आमतौर-पर यह व्यासका माना जाता है।

वंशी थे, ऐसा मालूम होता है। यह पत्र उक्त मृगेश्वरवर्माके राज्यके तीसरे वर्ष, पौष[1] (?) नामके संवत्सरमें, कार्त्तिक कृष्णा दशमीको, जबकि उत्तरा भाद्रपद नक्षत्र था, लिखा गया है। इसके द्वारा अभिषेक, उपलेपन, पूजन, भग्नसंस्कार (मरम्मत) और महिमा (प्रभावना) इन कामोंके लिये कुछ भूमि, जिसका परिमाण दिया है, अरहन्तदेवके निमित्त दान की गयी है। भूमिकी तफसीलमें एक निवर्तनभूमि खालिस पुष्पोंके लिये निर्दिष्ट की गई है। ग्रामका नाम कुछ स्पष्ट नहीं हुआ, 'बृहत्परलूरे' ऐसा पाठ पढ़ा जाता है। अन्तमें लिखा है कि जो कोई लोभ या अधर्मसे इस दानका अपहरण करेगा वह पंचमहापापोंसे युक्त होगा और जो इसकी रक्षा करेगा वह इस दानके पुण्य-फलका भागी होगा। साथ ही इसके समर्थनमें चार श्लोक भी 'उक्तं' च रूपसे दिये हैं, जिनमेंसे एक श्लोकमें यह बतलाया है कि जो अपनी या दूसरेकी दान की हुई भूमिका अपहरण करता है वह साठ हजार वर्ष तक नरकमें पकाया जाता है, अर्थात् कष्ट भोगता है। और दूसरेमें यह सूचित किया है कि स्वयं दान देना आसान है परंतु अन्यके दानार्थका पालन करना कठिन है, अतः दानकी अपेक्षा दानका अनुपालन श्रेष्ठ है। इन 'उक्तं च' श्लोकोंके बाद इस पत्रके लेखकका नाम 'दामकीर्ति भोजक' दिया है और उसे परम धार्मिक प्रकट किया है। इस पत्रके शुरूमें अर्हन्तकी स्तुतिविषयक एक सुन्दर पद्य भी दिया हुआ है जो दूसरे पत्रोंके शुरूमें नहीं है, परंतु तीसरे पत्रके बिल्कुल अन्तमें जरासे परिवर्तनके साथ जरूर पाया जाता[2] है।]

९८

देवगिरि (जिला-धारवाड़)—संस्कृत

—[?]—

सिद्धम्॥ **विजयवैजयन्त्याम्** स्वामिमहासेनमातृगणानुद्ध्यातामिषि-

---

१ साठ संवत्सरोंमें इस नामका कोई संवत्सर नहीं है। सम्भव है कि यह किसी संवत्सरका पर्याय नाम हो या उस समय दूसरे नामोंके भी संवत्सर प्रचलित हों। २ यह और आगेके लेख नं० ९८ और १०५ जैनहितैषी, भाग १४, अङ्क ७-८, पृ० २२८-२२९ से उद्धृत किये हैं।

क्तस्य **मानव्य**सगोत्रस्य **हारिती**पुत्रस्य प्रतिकृतचर्च्चापारस्य विबुधप्रतिबिम्बानां **कदम्बा**नां धर्ममहाराजस्य **श्रीविजयशिवमृगेशवर्म्मणः** विजयायुरोग्यैश्वर्यप्रवर्द्धनकरः **संव्वत्सरः चतुर्त्थः** वर्षापक्षः अष्टमः तिथिः पौर्ण्णमासी अनयानुपूर्व्या अनेकजन्मान्तरोपार्ज्जितविपुलपुण्यस्कंधः सुविशुद्धपितृमातृवंशः उभयलोकप्रियहितकरानेकशास्त्रार्थतत्वविज्ञानविवेच्च (?) ने विनिविष्टविशालोदारमतिः हस्त्यश्वारोहणप्रहरणादिषु व्यायामिकीषु भूमिषु यथावत्कृतश्रमः दक्षो दक्षिणः नयविनयकुशलः अनेकाहवार्ज्जितपरमदृढ़सत्वः उदात्तबुद्धिर्धैर्यवीर्य्यत्यागसम्पन्नः सुमहति समरसङ्कटे स्वभुजबलपराक्रमावाप्तविपुलैश्वर्यः सम्यक्प्रजापालनपरः स्वजनकुमुदवनप्रबोधनशशाङ्कः देवद्विजगुरुसाधुजनेभ्यः गोभूमिहिरण्यशयनाच्छादनान्नादिअनेकविधदाननित्यः विद्वत्सुहृत्स्वजनसामान्योपभुज्यमानमहाविभवः आदिकालराजवृत्तानुसारी धर्ममहाराजैः कदम्बानां श्रीविजय**शिवमृगेश**वर्म्मा **कालवङ्ग**ग्रामं त्रिधा विभज्य दत्तवान्। अत्र पूर्वमर्हच्छालापरमपुष्कलस्थाननिवासिभ्यः भगवदर्हन्महाजिनेन्द्रदेवताभ्य एको भागः, द्वितीयोर्हत्प्रोक्तसद्धर्म्मकरणपरस्य **श्वेतपटमहाश्रमणसंघो**पभोगाय, तृतीयो **निर्ग्रन्थमहाश्रमणसंघो**पभोगायेति। अत्र देवभाग धान्यदेवपूजाबलिचरुदेवकर्मकरभग्नक्रियाप्रवर्त्तनाद्यर्थोपभोगाय। एतदेवं न्यायलब्धं देवभोगसमयेन[2] योभिरक्षति स तत्फलभाग्भवति, यो विनाशयेत् स पंचमहापातकसंयुक्तो भवति। उक्तञ्च-बहुभिर्वसुधा भुक्ता राजभिस्सगरादिभिः यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं। **नरवर**सेनापतिना लिखितं।

[इं० ए०, जिल्द ७, पृ० ३७-३८, नं० ३७]

---

१ इन प्रतिलिपियोंमें विसर्ग उस चिह्नके स्थानमें लिखा गया है जो कण्ठ्यवर्णों (Gutturals) से पहले विसर्गकी जगह प्रयुक्त हुआ है। २ 'देवभागं समयेन' शुद्ध पाठ मालूम पड़ता है।

[यह दानपत्र कदम्बोंके धर्ममहाराज 'श्रीविजयशिवमृगेश वर्मा' की तरफसे लिखा गया है और इसके लेखक हैं 'नरवर' नामके सेनापति। लिखे जानेका समय चतुर्थसंवत्सर, वर्षा (ऋतु) का आठवाँ पक्ष और पौर्णमासी तिथि है। इस पत्रके द्वारा 'कालवङ्ग' नामके ग्रामको तीन भागोंमें विभाजित करके इस तरहपर बाँट दिया है कि पहला एक भाग तो अर्हच्छाला परम-पुष्कल स्थाननिवासी भगवान् अर्हन्महाजिनेन्द्रदेवताके लिये, दूसरा भाग अर्हत्प्रोक्त सद्धर्माचरणमें तत्पर श्वेताम्बरमहाश्रमणसंघके उपभोगके लिये और तीसरा भाग निर्ग्रन्थमहाश्रमणसंघके उपभोगके लिये। साथ ही, देवभागके सम्बन्धमें यह विधान किया है कि वह धान्य, देवपूजा, बलि, चरु, देवकर्म, कर, भग्नक्रिया-प्रवर्तनादि अर्थोपभोगके लिये है, और यह सब न्यायलब्ध है। अन्तमें इस दानके अभिरक्षकको वही दानके फलका भागी और विनाशकको पंच महापापोंसे युक्त होना बतलायाहै, जैसाकि नं० ९७ के दानपत्रमें उल्लेखित है। परंतु यहाँ उन चार 'उक्तं च' श्लोकोंमेंसे सिर्फ पहलेका एक श्लोक दिया है जिसका यह अर्थ होता है कि, इस पृथ्वीको सगरादि बहुतसे राजाओंने भोगा है, जिस समय जिस-जिसकी भूमि होती है उस समय उसी-उसीको फल लगता है।

इस पत्रमें 'चतुर्थ' संवत्सरके उल्लेखसे यद्यपि ऐसा भ्रम होता है कि यह दानपत्र भी उन्हीं मृगेश्वरवर्माका है जिनका उल्लेख पहले नम्बरके पत्र (शि० ले० नं. ९७) में है अर्थात् जिन्होंने पूर्वका (नं० ९७) दान-पत्र लिखाया था और जो उनके राज्यके तीसरे वर्षमें लिखा गया था, परंतु यह भ्रम ठीक नहीं है। कारण कि एक तो 'श्रीमृगेश्वरवर्मा' और 'श्रीवि-जयशिवमृगेशवर्मा' इन दोनों नामोंमें परस्पर बहुत बड़ा अन्तर है; दूसरे, पूर्वके पत्रमें 'आत्मनः राज्यस्य तृतीये वर्षे पौष संवत्सरे' इत्यादि पदोंके द्वारा जैसा स्पष्ट उल्लेख किया गया है वैसा इस पत्रमें नही है; इस पत्रके समय-निर्देशका ढंग बिलकुल उससे विलक्षण है। 'संवत्सरः चतुर्थः, वर्षा पक्षः अष्टमः, तिथिः पौर्णमासी,' इस कथनमें 'चतुर्थ' शब्द संभवतः ६० संवत्सरोंमेंसे चौथे नम्बरके 'प्रमोद' नामक संवत्सरका द्योतक मालूम होता है; तीसरे, पूर्वपत्रमें दातारने बड़े गौरवके साथ अनेक विशेषणोंसे युक्त जो अपने 'काकुत्स्थान्वय' का उल्लेख किया है और साथ ही अपने पिताका नाम

भी दिया है, वे दोनों बातें इस पत्रमें नहीं हैं जिनके, एक ही दाता होनेकी हालतमें, छोड़ दिये जानेकी कोई वजह मालूम नहीं होती; चौथे, इस पत्रमें अर्हन्तकी स्तुतिविषयक मंगलाचरण भी नहीं है, जैसाकि प्रथम पत्रमें पाया जाता है; इन सब बातोंसे ये दोनों पत्र एक ही राजाके मालूम नहीं होते।

इस पत्र नं. ९८ में श्रीविजयशिवमृगेशवर्माके जो विशेषण दिये हैं उनसे यह भी पता चलता है कि, यह राजा उभयलोककी दृष्टिसे प्रिय और हितकर ऐसे अनेक शास्त्रोंके अर्थ तथा तत्त्वविज्ञानके विवेचनमें बड़ा ही उदारमति था, नय-विनयमें कुशल था और ऊँचे दर्जेके बुद्धि, धैर्य, वीर्य, तथा त्यागसे युक्त था। इसने व्यायामकी भूमियोंमें यथावत् परिश्रम किया था और अपने भुजबल तथा पराक्रमसे किसी बड़े भारी संग्राममें विपुल ऐश्वर्यकी प्राप्ति की थी; यह देव, द्विज, गुरु और साधुजनोंको नित्य ही गौ, भूमि, हिरण्य, शयन (शय्या), आच्छादन (वस्त्र) और अन्नादि अनेक प्रकारका दान दिया करता था; इसका महाविभव विद्वानों, सुहृदों और स्वजनोंके द्वारा सामान्यरूपसे उपभुक्त होता था; और यह आदिकालके राजा (संभवतः भरतचक्रवर्ती) के वृत्तानुसारी धर्मका महाराज था। दिगम्बर और श्वेताम्बर दोनों ही सम्प्रदायोंके जैनसाधुओंको यह राजा समानदृष्टिसे देखता था, यह बात इस दानपत्रसे बहुत ही स्पष्ट है।]

९९

हल्सी—संस्कृत।

—[?]—

स्वस्ति ॥

जयति भगवाञ्जिनेन्द्रो गुणरुन्द्रप्रथितपरमकारुणिकः
त्रैलोक्याश्वासकरी दयापताकोच्छ्रिता यस्य [॥]
कदम्बकुलसत्केतोः हेतोः पुण्यैकसम्पदाम्
श्रीकाकुस्थनरेन्द्रस्य सूनुर्भानुरिवापरः [॥]

श्रीशान्तिवरवर्म्मेति राजा राजीवलोचनः
खलेन वनिताकृष्टा येन लक्ष्मीर्द्विषद्गृहात् [॥]
तत्प्रियज्येष्ठतनयः श्रीमृगेशनराधिपः ।
लोकैकधर्मविजयी द्विजसामन्तपूजितः [॥]
मत्वा दानं दरिद्राणां महाफलमितीव यः
स्वयं भयदरिद्रोऽपि शत्रुभ्योऽदान्महाभयम्[1] [॥]
तुङ्गगङ्गकुलोत्सादी पल्लवप्रलयानलः
स्वार्यके नृपतौ भक्त्या कारयित्वा जिनालयम् [॥]

श्रीविजयपलाशिकायां **यापनि(नी)यनिर्ग्रन्थकूर्च्चकानां** स्ववैजयिके अष्टमे **वैशाखे** संवत्सरे कार्त्तिकपौर्णमास्याम् । मातृसरित आरभ्य आ इङ्गिणीसङ्गमात् राजमानेन त्रयस्त्रिंशन्निवर्त्तनं । श्रीविजयवैजयन्तीनिवासी दत्तवान् भगवद्भ्यो[2]र्हद्भ्यः[।]तत्राज्ञप्तिः । **दामकीर्त्तिभोजकः** जियन्तश्चायुक्तकः सर्व्वस्यानुष्ठाता इति [॥]

अपि च—उक्तम् [।]

बहुभिर्व्वसुधा दत्ता राजभिस्सगरादिभिः
यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् [॥]
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्
षष्टिवर्षसहस्राणि **कुम्भीपाके** स पच्यते [॥]

सिद्धिरस्तु[2] ।

[यह दानपत्र शान्तिवर्माके ज्येष्ठ पुत्र राजा मृगेशवर्माका है । उन्होंने

---

१ हमारी रायमें यह पाठ 'ऽदान्महाभयम्' ऐसा होना चाहिये । २ यह और आगे का १०३ वाँ शिलालेख (ताम्रपत्र) 'अनेकान्त', वर्ष ७, किरण १-२, पृष्ठ ८-९ से लिया है ।

स्वर्गगत राजा (शान्तिवर्मा) की भक्तिसे पलाशिका नामक नगरमें जिनालय निर्माण कराके अपनी विजयके आठवें वर्षमें यापनीयों, निर्ग्रन्थों और कूर्चकोंके लिये भूमि दान किया है । यहाँ कूर्चक सम्प्रदाय दिगम्बर सम्प्रदायका ही एक भेद मालूम पड़ता है[1] ।

[इं० ए०, जिल्द ६, पृ० २४-२५]

१००

हल्सी—संस्कृत ।

—[?]—

प्रथम पत्र

[१] जयति भगवाञ्जिनेन्द्रो गुणरुन्द्रᳫ प्रथितपरमकारुणिकः त्रैलोक्या

[२] श्वासकरी दयापताकोच्छ्रिता यस्य ॥ स्वामिमहासेनमातृगणानु-

[३] ध्यातानां **मानव्यस**गोत्राणां **हारिती**पुत्राणां प्रतिकृतस्वाध्याय च [र्च्चा]-

दूसरा पत्र; पहिली ओर ।

[४] पारगाणाम् स्वकृतपुण्यफलोपभोक्तृणाम् स्वबाहुवीर्य्योपार्ज्जि-

[५] तैश्वर्यभोगभागिनाम् सद्धर्म्मसदम्बानां **कदम्बानाम्** ॥ **काकुस्थ-**

[६] **वर्म्म**नृपलब्धमहाप्रसादः संभुक्तवाञ्छुतनिधिᳫ**श्रुतकीर्त्तिभोजः**

दूसरा पत्र; दूसरी ओर ।

[७] ग्रामं पुरा नृषु वरᳫपुरुपुण्यभागी **खेटाह्व**कं यजनदानदयो-

[८] पपन्नः ॥ तस्मिन्स्वर्य्याते **शान्तिवर्म्मा**वनीशः मात्रे धर्म्मार्थं दत्तवान् दा-

[९] मकीर्त्तेः भूमौ विख्यातस्तत्सुतᳫ**श्रीमृगेश**ः पित्रानुज्ञातं धार्म्मिको दान-

---

१ देखो अनेकान्त, वर्ष ७, किरण १-२, पृष्ठ ७-८, में श्री पं. नाथूरामजी प्रेमीका 'कूर्चकोंका सम्प्रदाय' नामक लेख ।

तीसरा पत्र; पहली ओर ।

[१०] मेव ॥ श्रीदामकीर्त्तेरुरुपुण्यकीर्त्तेः सद्धर्म्ममार्गस्थितशुद्ध-
बुद्धेः ज्याया-
[११] न्सुतो धर्म्मपरो यशस्वी विशुद्धबुद्धया (द्धय) ङ्युतो गुणाढ्यः
आचार्य्यैर्बन्धु—
[१२] षेणाह्वैः निमित्तज्ञानपारगैः स्थापितो भुवि यद्वंशः श्रीकीर्त्ति-
[१३] कुलवृद्धये [॥] तत्प्रसादेन लब्धश्रीः दानपूजाक्रियोद्यतः गुरु-

तीसरा पत्र; दूसरी ओर ।

[१४] भक्तो विनीतात्मा परात्महितकाम्यया ॥ जयकीर्त्तिप्रतीहार
प्रसादान्नृप-
[१५] तेः रवेः पुण्यार्थं स्वपितुर्म्मात्रे दत्तवान् पुरुखेटकं ॥ जिने-
न्द्रमहिमा
[१६] कार्य्या प्रतिसंवत्सरं क्रमात् अष्टाहकृतमर्य्यादा कार्त्तिक्या-
न्तद्धना-
[१७] गमात् वार्षिकांश्चतुरो मासान् यापनीयास्तपस्विनः
भु[ङ्गीरस्तु]

चतुर्थ पत्र; पहली ओर ।

[१८] यथान्याय्यं महिमाशेषवस्तुकम् [॥] कुमारदत्तप्रमुखा
हि सूरयः
[१९] अनेकशास्त्रागमखिन्नबुद्धयः जगत्प्रतीतास्सुतपोधनान्विताः
गणो
[२०] स्य तेषां भवति प्रमाणतः ॥ धर्म्मेप्सुभिर्ज्जानपदैस्सनागरैः
[२१] जिनेन्द्रपूजा सततं प्रणेया इति स्थितिं स्थापितवान् रवीशः

पला [शिका]

चतुर्थ पत्र; दूसरी ओर ।

[२२] यां नगरे विशाले ॥ स्थित्यानया पूर्व्वनृपानुजुष्टया यत्ताम्र-
पत्रेषु नि-

[२३] बद्धमादौ धर्म्माप्रमत्तेन नृपेण रक्ष्यं संसारदोषं प्रविचार्य्य

[२४] बुद्ध्या [॥] बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः
यस्य यस्य

[२५] यदा भूमिस्तस्य तस्य तदा फलम् ॥ स्वदत्तां परदत्तां वा
यो हरेत

पञ्चम पत्र

[२६] वसुन्धरां षष्टिं वर्षसहस्राणि नरके पच्यते भृशम् ॥ अद्भि-
र्दत्तं त्रिभि-

[२७] र्भुक्तं सद्भिश्च[1] परिपालितम् एतानि न निवर्त्तन्ते पूर्व्वराज-
कृतानि च [॥]

[२८] यस्मिञ्जिनेन्द्रपूजा प्रवर्त्तते तत्र तत्र देशपरिवृद्धिः

[२९] नगराणां निर्भयता तद्देशस्वामिनाश्चोर्जा ॥ नमो नमः [॥]

[ई० ए० जिल्द ६, पृ० २५–२७, नं. २२]

[यह लेख जैनधर्मका 'अष्टाह्निका' नामका उत्सव मनानेके लिये रवि-वर्म्मा और अन्य लोगों द्वारा दिये गये दानों और हुक्मोंका उल्लेख करता है। इसमें कदम्बोंके राजा काकुस्थ (काकुत्स्थ)वर्मा का, उसके बाद शान्तिवर्मा, तत्पश्चात् श्री मृगेश (वर्मा) का और अन्तमें रविवर्माके दान-का वर्णन है। जिस गांव का दान दिया गया उसका नाम है पुरुखेटक ।

---

१ मि० राइस इसको 'षड्भिश्च प्रतिपालितम्' पढ़ते हैं और उसका अर्थ 'छः पीढ़ियोंतक जानेवाला' दान करते हैं ।

१०१

हल्सी—संस्कृत ।

—[?]—

प्रथम पत्र ।

[१] जयति भगवाञ्जिनेन्द्रो गुणरुन्द्रऽ प्रथितपरमकारु-

[२] णिकः त्रैलोक्याश्वासकरी दयापताकोच्छ्रिता यस्य ॥

[३] **श्रीविष्णुवर्म्म**प्रभृतीन्नरेन्द्रान् निहत्य जित्वा पृथिवीं सम[स्तां]

[४] उत्साद्य **काश्वीश्वर**चण्डदण्डम् **पलाशिका**यां समव**स्थि**तस्सः[॥]

द्वितीय पत्र; पहली ओर ।

[५] **रवि कदम्बोरु** कुलाम्बरस्य गुणांशुभिर्व्याप्य जगत्सम[स्तं]

[६] मानेन चत्त्वारि निवर्त्तनानि ददौ जिनेन्द्राय महीम् महेन्द्रः [॥]

[७] संप्राप्य मातुश्चरणप्रसादं धर्म्मैकमूर्त्तेरपि **दामकीर्त्तेः**

[८] तत्पुण्यवृद्ध्यर्थमभून्निमित्तम् **श्रीकीर्त्ति**नामा तु च तत्कनिष्ठः[॥]

दूसरा पत्र; दूसरी ओर ।

[९] रागात्प्रमादादथवापि लोभात् यस्तानि हिंस्यादिह भूमि-

[१०] पालः आसप्तमं तस्य कुलं कदाचित् नापैति कृत्स्नान्निरया-
न्निमग्नम् [॥]

[११] तान्येव यो रक्षति पुण्यकाङ्क्षः स्ववंशजो वा परवंशजो वा

[१२] स मोदमानस्सुरसुन्दरीभिः चिरं सदा क्रीडति नाकपृष्ठे [॥]

तीसरा पत्र ।

[१३] अपि चोक्तं **मनुना** [।] बहुभिर्व्वसुधा दत्ता राजभिस्सगरा-
दिभिः

[१४] यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् ॥

[१५] स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्

[१६] षष्टिवर्षसहस्राणि निरये स विपच्यते ॥

[इस लेखमें रविवर्माके द्वारा जिनेन्द्रदेवके लिये दिये गये एक भूमि-दानका उल्लेख है। दान की गई भूमि नापमें ४ निवर्तन थी, दामकीर्ति, जो कि धर्ममूर्ति थे, की माताके चरणोंका प्रसाद पाकरके ही यह राजा दानमें प्रवृत्त हुआ। दामकीर्ति के छोटे भाईका नाम श्रीकीर्त्ति था। रविवर्मा पलाशिकामें रहते थे। इन्होंने श्रीविष्णुवर्मा(संभवतः 'विष्णुगोप' या 'विष्णुगोपवर्मा' नामका पल्लव राजा) और दूसरे अन्य राजाओंका वध किया था, समस्त पृथ्वीको जीता था और काञ्चीश्वरके चण्डदण्डका उत्सादन (निर्मूलन) किया था।]

[इं० ए०, जिल्द ६, पृ० २९–३०, नं० २४]

१०२

हल्सी—संस्कृत ।

—[?]—

प्रथम पत्र ।

स्वस्ति ॥

जयति भगवाञ्जिनेन्द्रो गुणरुन्द्रश्च प्रथितपरमकारुणिकः

त्रैलोक्याश्वासकरी दयापताकोच्छ्रिता यस्य ॥

श्रीमत्**काकुस्थराज**प्रियहिततनय**श्शान्तिवर्म्मा**वनीश

तस्यैव ज्येष्ठसूनुश्च प्रथितपृथुयशा **श्रीमृगेशो** नरेशः ॥ (।)

दूसरा पत्र; पहली ओर ।

तत्पुत्रो दीप्ततेजा **रविनृ**पतिरभूत्सत्त्वधैर्य्यार्ज्जितश्रीः

तद्भ्राता **भानुवर्म्मा** स्वपरहितकरो भाति भूप(:) कनीयान् ॥

तेनेयं वसुधा दत्ता जिनेभ्यो भूतिमिच्छता ।

पौर्ण्णमासीष्वनुच्छिद्य क्षपनार्थं हि सर्व्वदा ॥

पलाशिकायाम् कर्दमपट्यां राजमानेन

दूसरा पत्र; दूसरी ओर

पञ्चदशनिवर्त्तना तांब्रशासने भूमिर्निबद्धा उच्छ्कारभरादिविवर्जिता श्रीम**द्भानुवर्म**राजलब्धपादप्रसादेन **पण्डर**भोजकेन परमार्हद्भक्तेन प्रवर्द्धमानराज्य**श्रीरविवर्म्म**धर्म्ममहाराजस्य एकादशे संवत्सरे हेमन्तषष्ठपक्षे

तीसरा पत्र ।

दशम्यां तिथौ ॥ तां यो हिनस्ति स्ववंश्यः परवंश्यो वा स पञ्चमहापातकसंयुक्तो भवति ॥ उक्तञ्च ॥

बहुभिर्व्वसुधा दत्ता राजभिः सगरादिभिः
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधरां
षष्टिवर्षसहस्राणि कुम्भीपाके स पच्यते

[इस लेखमें भानुवर्मा और उसके अधीनस्थ कर्मचारी पण्डर 'भोजक' के दानका उल्लेख है। यह दान भानुवर्माके बड़े भाई रविवर्माके राज्यके ११ वें वर्षमें, हेमन्तऋतुके छठे पक्षमें दसवीं तिथिको दिया गया था। इस भूमिका दान जिनभगवानकी हर पूर्णिमाके दिन पूजन करनेके लिये ही हुआ था। भूमिका नाप १५ निवर्तन था। यह भूमि पलाशिका गाँवके कर्दमपटी की थी। इस लेखसे कदम्बवंशके राजाओंकी रविवर्माके समयतककी वंशावलीका भी पता चलता है और वह यह है:—

१. काकुत्स्थवर्मा
|
२. शान्तिवर्मा
|
३. श्रीमृगेश
|
४. रविवर्मा (छोटा भाई भानुवर्मा)।

[इं० ए०, जिल्द ६, पृ० २७-२९]

१०३

हल्सी—संस्कृत।

—[?]—

सिद्धम् ॥ स्वस्ति स्वामिमहासेनमातृगणानुध्याताभिषिक्तानाम् **'मानव्य'**-सगोत्राणाम् **हारितीपुत्राणाम्** प्रतिकृतस्वाध्यायचर्च्चिकानाम् **कदम्बा(म्बा)**नाम्महाराजः श्री**हरिवर्म्मा**

बहुभवकृतैः पुण्यै राजश्रियं निरुपद्रवाम्
प्रकृतिषु हितः प्राप्तो व्याप्तो जगद्यशसाखिलम्
श्रुतजलनिधिः विद्यावृद्धप्रदिष्टपथि स्थितः
स्वबलकुलिशाघातोच्छिन्नद्विषद्वसुधाधरः [॥]

स्वराज्यसंवत्सरे चतुर्थे फाल्गुणशुक्लत्रयोदश्याम् **उच्चभृङ्गयाम्** सर्व्वजनमनोह्लादवचनकर्म्मणा सपितृव्येण **शिवरथ**नामधेयेनोपदिष्टः **पलाशिकायाम्** भारद्वाज-सगोत्र**सिंहसेनापति**सुतेन **मृगेशेन** कारितस्यार्हदायतनस्य प्रतिवर्षमाष्टाह्निकमहामहसततच (?) रूपलेपन-क्रियार्थं तदवशिष्टं सर्व्वसंघभोजनायेति सुदि (?) लि **कुन्दूर**विषये **वसुन्तवाटकं** सर्व्वपरिहारसंयुतं **कूर्च्चकानाम् वारिषेणाचार्यसङ्घ**-हस्ते **चन्द्रक्षान्तं** प्रमुखं कृत्वा दत्तवान् [॥] य एवं न्यायतोभिरक्षति स तत्पुण्यफलभाग्भवति [।] यश्चैनं रागद्वेषलोभमोहैरपहरति स निकृ-ष्टतमां गतिमवाप्नोति [॥] उक्तञ्च—

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्
षष्टिं वर्षसहस्राणि नरके पच्यते तु सः [॥]
बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् [॥] इति

वर्धतां वर्धमानार्हच्छासनं संयमासनम्
येनाद्यापि जगज्जीवपापपुंजप्रभंजनम् [॥] नमोर्हते वर्धमानाय [॥]

[यह दानपत्र कदम्ब-राजवंशके महाराजा हरिवर्माका है। उन्होंने अपने राज्यके चौथे वर्षमें शिवरथ नामके पितृव्यके उपदेशसे, सिंहसेनापतिके पुत्र मृगेशद्वारा निर्मापित जैनमन्दिरकी अष्टाह्निका-पूजाके लिये और सर्वसंघके भोजनके लिए 'वसुन्तवाटक' नामक गाँव कूर्चकोंके वारिषेणाचार्यसंघके हाथमें चन्द्रक्षान्तको प्रमुख बनाकर प्रदान किया। यह और ९९ वां दान-पत्र दोनों, ताम्रपत्रोंपर हैं। नम्बर ९९ वें के दान-पत्रमें यापनीय, निर्ग्रन्थ और कूर्चक इन तीन सम्प्रदायोंके नाम हैं और इसमें सिर्फ कूर्चक सम्प्रदा-यका। इससे मालूम होता है कि इस सम्प्रदायमें 'वारिषेणाचार्यसंघ' नामका एक संघ था, जिसके प्रधान चन्द्रक्षान्त (मुनि) थे।]

[इं० ए०, जिल्द ६, पृ० ३०-३१]

१०४

हल्सी—संस्कृत।

—[?]—

प्रथमपत्र।

सिद्धम् ॥ स्वस्ति ॥ स्वामि**महासेन**मातृगणानुध्यानाभिषिक्तानाम् **मानव्य**सगोत्राणा[म्] **हारिती**पुत्राणाम् प्रतिकृतस्वाध्यायचर्च्चापा-राणाम् कदम्बानाम् महाराजश्री**रविवर्म्मणः** स्वभुजबलपराक्रमावाप्ता(?) निरवद्यविपुलराज्यश्रियः विद्वन्मतिसुवर्ण्णनिकषभूतस्य कामाद्यरिगण-

दूसरा पत्र; पहली ओर।

त्यागाभिव्यञ्जितेन्द्रियजयस्य न्यायोपार्जितार्थ [सं] हितसाधुज [न]-स्य क्षितितलप्रततविमलयशसः प्रियतनयः पूर्व्वसुचरितोपचितविपुल-पुण्यसम्पादितशरीरबुद्धिसत्वः सर्व्वप्रजाहृदयकुमुदचन्द्रमाः महाराज-श्री**हरिवर्म्मा** स्वराज्यसंवत्सरे पञ्चमे **पलाशिका**धिष्ठाने **अहरिष्टि**-समाह्वय-

दूसरा पत्र; दूसरी ओर ।

श्रमणसङ्घान्वयवस्तुनः **धर्म्मनन्द्याचार्य्या**धिष्ठितप्रामाण्यस्य चैत्यालयस्य पूजासंस्कारनिमित्तम् साधुजनोपयोगार्थञ्च **सेन्द्रकाणां** कुलललामभूतस्य **भानुशक्ति**राजस्य विज्ञापनया **मरदे** ग्रामं दत्तवान् [॥] य एतल्लोभाद्वै कदाचिदपहरेत् स पञ्चमहापातकसंयुक्तो भवति यश्चाभिरक्षति स तत्पुण्यफलम्

तीसरा पत्र ।

अवाप्नोतीति [॥] उक्तञ्च ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्
षष्टिवर्षसहस्राणि नरके पच्यते तु सः ॥
बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादि [भिः]
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
ये सेतूनभिरक्षन्ति भग्नान् संस्थापयन्ति च ।
द्विगुणं पूर्व्वकर्तृभ्यः तत्फलं समुदाहृतम् [॥]

[इस लेखमें अपने राज्यके पाँचवें वर्षमें सेन्द्रकके कुलके भानुशक्ति राजाकी प्रार्थनापर हरिवर्म्माने 'मरदे' नामका गाँव दानमें दिया था, इस बातका उल्लेख है। यह हरिवर्मा रविवर्माका प्रियपुत्र है। यह दान राजधानी पलाशिकामें किया गया। इस दानका निमित्त वह चैत्यालय था जो कि 'अहरिष्टि' नामके श्रमणसङ्घकी सम्पत्ति थी और जिसपर आचार्य धर्मनन्दिकी आज्ञा चलती थी; उस चैत्यालयके पूजा इत्यादिके प्रबंधके लिये तथा साधुजनोंके उपयोगके लिये ही यह दान किया गया।]

[इं० ए०, जिल्द ६, पृ० ३१-३२.]

१०५

देवगिरि—संस्कृत ।

—[?]—

विजय**त्रिपर्व्वते** स्वामिमहासेनमातृगणानुध्याताभिषिक्तस्य **मानव्य**-सगोत्रस्य प्रतिकृतस्वाध्यायचर्चापारगस्य आदिकालराजर्षिबिम्बानां आश्रि-तजनाम्बानां **कदम्बा**नां धर्ममहाराजस्य अश्वमेधयाजिनः समरार्जितविपु-लैश्वर्यस्य सामन्तराजविशेषरत्नसुनागजिनाकम्पदायानुभूतस्य (?) शरद-मलनभस्युदितशशिसदृशैकातपत्रस्य धर्ममहाराजस्य **श्रीकृष्णवर्म्मणः** प्रियतनयो **देववर्म्म**युवराजः स्वपुण्यफलाभिकांक्षया त्रिलोकभूतहितदे-शिनः धर्मप्रवर्त्तनस्य अर्हतः भगवतः चैत्यालयस्य भग्नसंस्कारार्च्चनमहि-मार्थं **यापनीय [स] ङ्घेभ्यः** सिद्धकेदारे राजमानेन (?) द्वादश निवर्त्तनानि क्षेत्रं दत्तवान् योस्य अपहर्त्ता स पंचमहापातकसंयुक्तो भवति योस्याभिर-क्षिता स पुण्यफलमश्नुते (।) उक्तं च—बहुभिर्वसुधा भुक्ता राजभिस्सगरा-दिभिः । यस्य यस्य यदा भूमिस्तस्य तस्य तथा (?) फलं ॥ अद्भिर्दत्तं त्रिभिर्युक्तं सद्भिश्च परिपालितं । एतानि न निवर्त्तन्ते पूर्वराजकृतानि च ॥

स्वं दातुं सुमहच्छक्यं दु (?):ख (म) न्यार्त्थपालनं ।
दानं वा पालनं वेति दानाच्छ्रेयोनुपालनम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धरां ।
षष्ठिवर्षसहस्राणि नरके पच्यते तु सः ॥
श्रीकृष्णनृपपुत्रेण कदम्बकुलकेतुना ।
रणप्रियेण **देवे**न दत्ता भूमिस्त्रि**पर्व्वते** ॥
दयामृतसुखास्वादपूतपुण्यगुणेप्सुना ।
देववर्म्मैकवीरेण दत्ता जैनाय भूरियम् ॥

जयत्यर्हन्त्रिलोकेशः सर्व्वभूतहितंकरः ।
रागाद्यरिहरोनन्तोनन्तज्ञानदृगीश्वरः ॥

[इं० ए०, जिल्द ७, पृ० ३३-३५, नं. ३५]

[यह दानपत्र कदम्बोंके धर्ममहाराज श्रीकृष्णवर्माके प्रियपुत्र 'देववर्मा' नामके युवराजकी तरफसे लिखा गया है और इसके द्वारा 'त्रिपर्वत' के ऊपरका कुछ क्षेत्र अर्हन्त भगवानके चैत्यालयकी मरम्मत, पूजा और महिमाके लिये 'यापनीय' संघको दान किया गया है ।

पत्रके अन्तमें इस दानको अपहरण करनेवाले और रक्षा करनेवालेके वास्ते वही क़सम दिलाई है अथवा वही विधान किया है जैसा कि ९७ नम्बरके दानपत्रके सम्बन्धमें पहले बतलाया गया है। वही चारों 'उक्तं च' पद्य भी कुछ क्रमभंगके साथ दिये हुए हैं और उनके बाद दो पद्योंमें इस दानका फिरसे खुलासा दिया है, जिसमें देववर्माको रणप्रिय, दयामृतसुखास्वादनसे पवित्र, पुण्यगुणोंका इच्छुक और एकवीर प्रकट किया है । अन्तमें अर्हन्तकी स्तुतिविषयक प्रायः वही पद्य है जो ९७ नम्बरके दानपत्रके शुरूमें दिया है । इस पत्रमें श्रीकृष्णवर्माको 'अश्वमेध' यज्ञका कर्ता और शरद् ऋतुके निर्मल आकाशमें उदित हुए चंद्रमाके समान एक छत्रका धारक, अर्थात् एकछत्र पृथ्वीका राज्य करनेवाला लिखा है ।]

पूर्वके नं० ९७,९८ व इस दानपत्रपरसे निम्नलिखित ऐतिहासिक व्यक्तियोंका पता चलता है:—

१ स्वामिमहासेन—गुरु ।
२ हारिती—मुख्य और प्रसिद्ध पुरुष ।
३ शान्तिवर्मा—राजा ।
४ मृगेश्वरवर्मा—राजा ।
५ विजयशिवमृगेशवर्मा—महाराजा ।
६ कृष्णवर्मा—महाराजा ।
७ देववर्मा—युवराज ।
८ दामकीर्ति—भोजक ।
९ नरवर—सेनापति ।

१०६

अल्तेम (जिला कोल्हापुर)—संस्कृत ।

[शक ४११=४८८ ई०]

पहला पत्र ।

स्वस्ति ॥ जयत्यनन्तसंसारपारावारैकसेतवः
महावीरार्हतः पूताश्चरणाम्बुजरेणवः ॥

श्रीमतां विश्व-विश्वम्भराभिसंस्तूयमान**मानव्य**सगोत्राणां **हारीति**-पुत्राणां सप्तलोकमातृभिस्सप्तमातृभिरभिवर्द्धितानां कार्त्तिकेयपरिरक्षणप्राप्त-कल्याणपरम्पराणां भगवन्नारायणप्रसादसमासादितवराहलाञ्छनेक्षणक्षण-वशीकृताशेषमहीभृतानां (भृताम्) **चालुक्यानां** कुलमलंकरिष्णोः ॥ स्वभुजोपार्जितवसुन्धरस्य निजयशश्श्रवणमात्रेणैवावनतराजकस्य कीर्त्तिप-ताकावभासितदिगन्तरालस्य **जयसिंहस्य राजसिंहस्य (?)** सूनुस्सूनृत-वागनवरतदानार्द्रीकृतकरस्सुरगज इव प्रशमनिधिस्तपोनिधिरिव दृप्तवैरिषु प्राप्तरणरागो **रणरागो**ऽभवत् [॥] तस्य चात्मजे श्वमेधनाव (०मेधाव) भृत (थ)-स्नानपवित्रीकृतगात्रे प्रणतपरनृपतिमकुटतटघटितहटन्मणिगण-किरणवार्द्धाराधौतचारुचरणकमलयुगले चित्रकण्ठाभिधानतुरङ्गमकण्ठीरवे-णोत्सारितारातिस्तम्भेरममण्डले वर्ण्णाश्रमसर्व्वधर्म्मपरिपालनपरे गङ्गासेतु(?) मध्यवर्तिदेशाधीश्वरे शक्तित्रयप्रवर्द्धितप्राज्यसाम्राज्ये गङ्गायमुनापालि-

दूसरा पत्र; पहली ओर ।

ध्वजदण्डकादिपञ्चमहाशब्दचिह्ने करदीकृत**चोल-चेर-केरल-सिंहल-कलिंग**भूपाले दण्डित**पाण्ड्या**दिमण्डि (ण्ड) लिके अप्रतिशासने **'सत्याश्रय'-श्री-पुलकेश**यभिधानपृथिवीवल्लभमहाराजाधिराजे पृथिवीमे-कातपत्रं शासति सति [॥] राजा **रुन्द्रनीलसैन्द्रक**वंशशशांकायमानः

प्रचण्डदोर्दण्डमण्डितमण्डलाग्रो **गोण्ड**नामासीत् [॥] अय-नय-विनयसम्पन्नस्तनयोऽस्य समररसरसिक**स्सिवारा**ख्यया ख्यातः [॥] पुत्रोऽस्य भूता (तो) धात्रीतिलकायमानः पराक्रमाक्रान्तवैरिनिकुरुम्बः अवार्य्यवीर्यसमन्वितः कार्य्याकार्य्यनिपुणः हनूमानिव रामस्याभिरामस्य तस्य भृत्यस्सत्यसन्धो धार्मिक**स्सामियार**स्समभूत् [॥] स तत्प्रसादसमासादित**कुहुण्डी**विषयस्तं परिपा[ल] यं (यन्) तदन्तर्भूता**लक्तक**ाभिधाननगर्य्यांग्रामसप्तशतराजधान्यामशेषविषयविशेषकायमानायां शालिव्रीहीक्षुवणचणकप्रियङ्गुवरकोदारकश्यामाकगोधूमाद्यनेकधान्यसमृद्धायां तद्देशविलासिनीमुखकमलमिव विराजमानायां धनधान्यपरिपूर्णकृषीवलप्रायायाम् ॥

ऐन्द्र्यां दिशि महेन्द्राभः प्रासादं प्रवरम्महत् जिनेन्द्रा—

दूसरा पत्र; दूसरी ओर ।

यतनं भक्त्याकारयत् सुमनोहरम् ॥
प्रोत्तुंग-प्रासादं त्रिभुवनतिलकं जिनालयं प्रवरं
नानास्तम्भसमुद्धृतविराजमानं चिरं जगति ॥

शकनृपाब्देष्वेकादशोत्तरेषु चतुष्षष्टेषु व्यतीतेषु **विभव**संवत्सरे प्रवर्त्तमाने ॥ कृते च जिनालये ।

वैशाखोदितपूर्णपुण्यदिवसे राहो (हौ) विधौ (धोर्) मण्ड़लं
श्लेष्टेन्देर्त्थिकमज्जनाद्[1]पगतं स्नेहाद् गृहं भूभुजम्
श्रीसत्याश्रयमाश्रयं गुणवतां विज्ञापयामास स
तज्जैनालयपूजनोचितनुतक्षेत्राय धर्म्मप्रियः ॥
आयुर्ज्जन्मवतामिदं ननु तदि (डि) त् सन्ध्येन्द्रा(न्द्र)चापोपमं
ज्ञात्वा धर्म्मम (ध) नार्ज्जनं बुधजनैर्म्मार्ल्य (ल्यै): फलं मन्यते

---

१ संभवतः शुद्ध पाठ 'श्लिष्टेऽन्वर्थिकमज्जनाद्' होना चाहिये ।

इत्येवं प्रविबोध्य सभ्यजनतां **सत्याश्रयो** वल्लभो
भक्त्या तज्जिनमन्दिरोपमक्रिये क्षेत्रं ददौ शासनम् ॥
वैशाखपौर्णमास्यां राहौ विधुमण्डलं प्रविष्टवति
सत्याश्रयनृपतिस्त्रि**भुवनतिलकाय** दत्तवान् क्षेत्रम् ॥
कनकोपलसम्भूतवृक्षमूलगुण (णा) न्वये
भूतस्समग्रराद्धान्तस्**सद्धनन्दि**मुनीश्वरः ॥
तस्यासीत् प्रथमश्शिष्यो देवताविनुतक्रमः
शिष्यैः पञ्चशतैर्युक्त—

तीसरा पत्र; पहिली ओर।

श्वितकचार्य्य-संज्ञितः ॥
श्रीमत्**काकोपला**म्नाये ख्यातकीर्त्तिर्बहुश्रुतः
लक्ष्मीवा**न्नागदेव्या**ख्य**श्वितकाचार्य्य**दीक्षितः ॥
नागदेवगुरोश्शिष्यः प्रभूतगुणवारिधिः
समस्तशास्त्रसम्बोधि (धी) **जिननन्दि**ः प्रकीर्त्तितः ॥
श्रीमद्विविधराजेन्द्रप्रस्फुरन्मकुटालिभिः
निघृष्टचरणाब्जाय प्रभवे जननन्दिने ॥

जिननन्द्याचार्य्यसूर्य्याय दुश्चरतपोविशेषनिकषोपलभूताय समधि-सर्व्वशास्त्राय नगरांशतलभोगांश्च प्रददौ [॥] तत्र तलभोगसीमान्याह [।] चैत्यालयाद् वायव्यां दिशि तटाकं तटो ऋजुसूत्रक्रमेण पश्चिमाभि-मुखं गत्वा पथं तस्य मध्ये निखातपाषाणं तस्माद् दक्षिणाभिमुखमनुपथं गत्वा प्रवाहं तस्यं (स्य) मध्ये निखातपाषाणं पूर्वाभिमुखं गत्वा तिन्त्रिणीकवृक्षं यावत् तस्मादुत्तराभिमुखं गत्वा पूर्व्वोक्त-तटाकं। यावत्[1]

---

१ इस पूर्णविराम की यहाँ कोई जरुरत नहीं है। 'पूर्व्वोक्त-तटाकं यावत्' ऐसा सम्बन्ध है।

स्थितं एतन्नगरनिवेशक्षेत्रम् [॥] तत्र तलभोगक्षेत्रसीमान्याह [।] नगरस्य दक्षिणस्यां दिशि सेतुबन्धात् प्रभृत्यनुजलवाहलं पूर्व्वाभिमुखं गत्वा यावदौञ्छिकक्षेत्रं तत्पश्चिमसीम्नि निखातपाषाणं यावत्तस्मादनुसीमोत्तराभिमुखं गत्वा यावच्छमीवल्मीकं तस्मात्पुनः पूर्व्वाभिमुखं गत्वा यावत् स्थलगिरि तस्मात्पुनरनुगिर्य्युत्तराभिमुखं गत्वा यावद्गिरेरुच्चप्रदेशं तस्मात् पश्चिमाभिमुखं गत्वा यावद्गिरि तस्मात् पश्चिमाभिमुखं गत्वा यावत्स्थलगिरि तस्मादक्षिणाभिमुखं गत्वा यावत्सेतुबन्धन (नं) स्थितं राजमनेन पञ्चाषट् सदुत्तरनिवर्त्तनशतं तलभोगक्षेत्रं चतुस्सीमाविरुद्धम् ॥ **नरिन्दक**नामग्रामे नैर्ऋत्यां दिशि नरिन्दक-सामरिवाद (ड) ग्रामपथि मध्यवर्त्तिसिंगतेगतटाकाद् ऋजुसूत्रक्रमेण नरिन्दकग्रामपथं यावत्तावत्स्थितं चत्वारिंशत् नि (सन्नि) वर्त्तनं क्षेत्रं दक्षिणदिशि राजमानेन ॥ **किणयिगे**नामग्रामे पूर्व्वस्यां दिशि अशीतिनिवर्त्तनं क्षेत्रं राजमानेन पिशाचारामं नैर्ऋत्यां दिशि यावच्छमीझाटवल्मीकं तस्मात् पूर्व्वाभिमुखं गत्वा यावत्पथं तस्मादक्षिणाभिमुखं गत्वा यावत्स्थलगिरि तस्मात् पश्चिमाभिमुखमनुस्थलगिरि गत्वा यावच्छमीस्थलं तस्मादुत्तराभिमुखं गत्वा यावच्छमी-झाटवल्मीकं स्थितं चतुस्सीमाविरुद्धम् ॥ **पन्तिगणगे** नामग्रामे

चतुर्थ पत्र; पहिली ओर ।

नैर्ऋत्यां दिशि मान्यस्य क्षेत्रं उत्तरस्यां दिशि चत्वारिंशन्निवर्त्तनं क्षेत्रं राजमानेन पश्चिमस्यां दिशि स्थलगिरि तस्मादनुसीमं पूर्व्वाभिमुखं गत्वा यावच्छमीवल्मीकं तस्मादक्षिणाभिमुखं गत्वा **कोमरञ्चे**-ग्राम-सीम तस्मात्पूर्व्वाभिमुखमनुसीमं गत्वा यावज्जलवाहलं तस्मादुत्तराभिमुखमनुवाहलं गत्वा यावच्छमीझाटवल्मीकं तस्मात्पश्चिमाभिमुखं गत्वा यावत्तटाकोत्तरकोडि (टि) तस्मादक्षिणाभिमुखमनुस्थलगिरि गत्वा यावत्तावत्स्थितं चतुस्सीमाविरुद्धम् ॥

मंगलीनामग्रामपश्चिमदिशि राजमानेन चत्वारिंशन्निवर्त्तनं क्षेत्रं तस्य सीमान्याह स्थलगिरेः पश्चिमाभिमुखमनुपथं गत्वा याव**द्दूविक**ग्रामसीम तस्मादुत्तराभिमुखमनुसीम गत्वा यावत्स्थलगिरि तस्मात्पूर्व्वाभिमुख-मनुस्थलगिरि गत्वा यावत्स्थलगिरि तस्माद्दक्षिणाभिमुखमनुस्थलगिरि गत्वा स्थितं चतुस्सीमाव (वि) रुद्धम् ॥ **करण्डिगे** नाम ग्रामे प—

चतुर्थ पत्र; दूसरी ओर ।

श्चिमस्यां दिशि **चन्दवुर-पन्दर्ङ्गवल्लि**नामग्राममार्गमध्ये अश्वत्थतटा-काद् वायव्यां दिशि राजमानेन पञ्चविंशतिनिवर्तनं क्षेत्रम् ॥ **दावनवल्लि**नामग्रामे पश्चिमस्यां दिशि **अलक्तक**नगर**कुम्बयिज**नामग्राम-मार्ग्गमध्ये बिम्बालयपिशाचारामात्पश्चिमे राजमानेन चत्वारिंशन्निवर्तनं क्षेत्रम् ॥ पुनरपि तस्मिन्नेव ग्रामे दक्षिणस्यां दिशि हिङ्गुटीतटाकादुत्तरस-मीपस्थं राजमानेन शतं नि (शत-नि) वर्तनं क्षेत्रम् ॥ **नन्दिणिगे**नाम ग्रामे पूर्व्वस्यां दिशि **बरवुलिक**सीम **श्रीपुर**मार्गमध्ये राजमानेन चत्वारिं-शन्निवर्तनं क्षेत्रम् ॥ **सिरिपत्ति**नामग्रामे पश्चिमस्यां दिशि **श्रीपुर**मार्ग्गतो दक्षिणतो राजमानेन चत्वारिंशन्निवर्तनं क्षेत्रम् ॥ **अर्जुनवाद (ड)** नामग्रामे पश्चिमस्यां दिशि श्रीपुरमार्ग्गतो उत्तरतो राजमानेन पञ्चाश-न्निवर्तनं क्षेत्रम् ॥ ग्रामनामान्याह ॥ **कुम्बयिज**-द्वादशस्यो (स्या) न्तः **रूविको** नाम

पाँचवाँ पत्र ।

ग्रामः प्रथमः ॥ **सामरिवादो (डो)** नाम ग्रामः द्वितीयः ॥ बढमाले द्वादशस्यान्तः **लहिवादो (डो)** नाम ग्रामः तृतीयः ॥ श्रीपुरद्वाद-शस्य मध्ये **पेल्लिदको** नाम ग्रामः चतुर्थः ॥ इत्येते चत्वारो ग्रामाः चतु-स्सीमाव (वि) रुद्धक्षेत्रः (त्राः) सोदङ्गाः स (सो) परिकराः अचाटभटप्रवेश्याः

[॥] तदागामिभिरस्मद्वंश्यैरन्यैश्च राजभिरायुरैश्वर्य्यादीनां विलसितमच्छिरांशुचञ्चलमवगच्छद्भिराचन्द्रार्कधराण्र्णवस्थितिसमकालं यशश्चिचीशुभिः स्वदत्तिनिर्व्विशेषं परिपालनीयमुक्तं च **मन्वादिभिः** ॥

बहुभिर्व्वसुधा भुक्ता राजभिस्**सगरा**दिभि-
र्यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् ।
स्वं दातुं सुमहच्छक्यं दुःखमन्यस्य पालनं
दानं वा पालनं श्रेयो श्रेयो दानस्य पालनम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥

[इं. ए., ७, पृ० २०९–२१७, नं. ४४]

[इस दानपत्रमें पुलिकेशीकी वंशावलि उसके पितामह (बाबा) जयसिंह और उसके पिता रणराग से लेकर दी हुई है । ऊपर बिरुदावलिमें यह वाक्यावली आती है, 'जयसिंहस्य राजसिंहस्य सूनुः···रणरागोऽभवत्°— जिससे सर वाल्टर ईलियटने सन्देहास्पदरूपसे यह फलितार्थ निकाला है कि 'राजसिंह' जयसिंहका दूसरा नाम था । पर यदि 'राजसिंह' यह व्यक्तिवाचक नाम हो भी, तो इससे जयसिंहकी उपाधिका ही पता लगेगा, जयसिंहके दूसरे नामका नहीं ।

तत्पश्चात् दानपत्रमें उसके (जयसिंहके) एक सामन्त सामियारका उल्लेख है जो रुन्द्रनील–सैन्द्रक वंशका है । यह सामियार कुहुण्डी जिलेका शासक था । इसके बाद यह वर्णन है कि सामियारने अलक्तकनगरमें, जो कि उस जिलेके ७०० गावोंके समूहोंमें एक प्रधान नगर था, एक जैनमन्दिर बनवाया, और राजाज्ञा लेकर, विभव संवत्सरमें जब कि शकवर्ष ४११ व्यतीत हो चुका था वैशाख महीने की पूर्णिमाके दिन चन्द्रग्रहणके अवसर-पर कुछ जमीन और गाँव मन्दिरको दिये ।]

१०७

आडूर [जिला धारवाड]; संस्कृत तथा कन्नड़–भग्न ।

—[?]—

पूर्ववर्ती चालुक्य **कीर्त्तिवर्म्मा प्रथम**का शिलालेख

[१]·····जयत्यनेकधा विश्वं विवृण्वन्नंशुमानिव

·····श्री–**वर्द्धमान**देवे·····

[२]·····न् (?) यप-दुः-प्रबाधनः [॥]

प्रभास (?) ति भुवं भूयो·····

[३]·····प्रताप-क्षत·····ि·····ि·····दान

·····

[४]·····कु (?) र (?)-तेजसा **वैजय**

·····र·····

[५]·····त्पाशभृद्विषमो यमः चित्तं वा मानसं सत्यं स्थितं

·····[॥] तेनेप (?)·····

[६]····**गामुण्ड**-निर्म्मापितजिनालयदानशालादिसंवृद्धये विज्ञप्तेन यशस्विना [।] पञ्चवि–

[७] शति-संख्यान-निवर्त्तन-कृत-प्रमं क्षेत्रं राजमानेन दत्तं त्वहितरक्षणं [।] [वि]–

[८] श्राव्य साक्षिणः कृत्वा उच्छोरिन्द-प्रधानकानन्यैरपि च राजन्यै रक्षणीयं स·····[॥]

[९] उक्तं च [।] स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् षष्टिं वर्षसहस्राणि विष्टाय(ा)म् [जाय]–

[१०] ते कृमिः [॥] स्वं दातुं सुमहच्छक्यं दुःखमन्यस्य पालनं दानं वा पालनं वेति दानाच्छ्रे[योऽनु]-

[११] पालनम् [॥] बहुभिर्व्वसुधा भुक्ता राजभि**सगरा**दिभि [:] यस्य यस्य यदा भूमिस् [तस्य त]-

[१२] स्य तदा फलम् [॥] आसीद् **विनयनन्दी**ति **परलूरगणा**-ग्रणीरिन्द्रभूतिरिव धरात् चत्·····[सं]-

[१३] घ-संहतेः [॥] तस्यान्ते वसन्नासीत् **वासुदेवो** गुरुर्गुरुः तस्य शिष्य [:] **प्रभा**·····[॥]

[१४] शिष्य [:] **श्रीपाल**नामास्य धर्म्मगामुण्ड-पुत्रजः प्रातिष्ठिपच्छिलापट्टं स्थेयादाचन्द्र [तारकं] [॥]

दूसरा लेख ।

[१५] स्वस्ति श्रीमत् प्रि (पृ) थु (थि) वीवल्लभ राजाधिराज परमेश्वर **कीर्त्तिवर्म्म**रसर् पृथु (थि) विर् [ज्यं-गे]-

[१६] ये सिन्दरसरग्ग (? ग्गा; ? ग्गं)गि (? धि) **पाण्डीपुर**मा-नाले परमेश्वरं **माधवत्ति**यरसरग्गे वि [ज्ञापनं-गे]-

[१७] य्दु **दोणगामुण्डरुं एळगामुण्डरुं** मल्लेयरुं उच्छराढा (? वा) सर्वेरेयरु ह····· ·····

[१८] करणसहितमागि हविरक्षतगन्धपुष्पादिगन्धे **कर्म्मगल्**ए पडुवण म·····`·····

[१९] य केळगे एण्टु मत्तलगल्दे राजमानं जिनेन्द्र-भवनक्कित्तोरि-दानाराट् सलिप्पोर [व]-

[२०] र्ते धर्म्ममारारिदा[न्] किडिप्पोरवर्त्तेपाप[म्] [॥] परल्लरा चेदियद बळि **प्रभाचन्द्र**-गुरावर्पडेदा[र्] [॥]

[इस लेखमें कुल २० पंक्तियाँ हैं। पंक्ति १ से १४ तकमें एक संस्कृत शिलालेख है जिसमें दानशालाके लिये तथा दूसरे और भी कार्योंके लिये एक खेत के, तथा गामुण्ड (गाँव के मुखियों) में से किसी के द्वारा निर्म्मापित जिनालय के दानकी प्रशस्ति है। वैजयन्ती या बनवासी का वर्णन चौथी पंक्तिमें हुआ-सा मालूम पड़ता है।

पंक्ति १५ से २० तक प्रायः पूर्ण हैं (खण्डित नहीं हैं) और उनमें एक पुरानी कर्णाटक-भाषाका लेख है जिसमें यह उल्लेख है कि, जिस समय कीर्तिवर्म्मा सार्वभौम-सत्ताके रूपमें शासन कर रहा था, और जब कि सिन्द नामका कोई एक राजा पाण्डीपुर नगरमें शासन कर रहा था दोण-गामुण्ड और एळगामुण्ड आदिने, राजा माधवत्तिकी सम्मतिसे, जिनेन्द्रके मन्दिरको पूजाके प्रबन्धके लिये अक्षत (अखण्ड चावल), सुगन्ध, पुष्प आदि, और चावलके खेतोंके आठ 'मत्तल' शाही मापसे नाप कर दिये। ये चावलके खेत कर्म्मगल्लूर गाँवकी पश्चिमदिशामें थे।

इस शिलालेखका काल नहीं दिया है। लेकिन कीर्त्तिवर्म्माको जो उपाधियाँ दी हुई हैं उनसे, तथा अक्षरोंकी लिखावटसे यह स्पष्ट मालूम पड़ता है कि इस लेखमें उल्लेखित कीर्त्तिवर्म्मा पूर्ववर्त्ती चालुक्य राजा कीर्त्तिवर्म्मा प्रथम है, जिसके राज्यका अन्त शक ४८९ में हुआ था। इस लेखसे यह भी मालूम पड़ता है कि कीर्त्तिवर्म्मा प्रथमने कदम्बोंको जीता था।]

[इं. ए०, ११, पृ० ६८-७१, नं० १२०]

१०८

एहोले (जिला-कलद्गी)-संस्कृत।

[शक सं० ५५६=६३४ ई०]

चालुक्यवंशोद्भूतश्रीपुलकेशीका शिलालेख।

जयति भगवाञ्जिनेन्द्रो[वी]तज[रा-म]रणजन्मनो यस्य।
ज्ञानसमुद्रान्तर्गतमखिलं जगदन्तरीपमिव ॥ १ ॥
तदनु चिरमपरिचेयश्चालुक्यकुलविपुलंजलनिधिर्जयति।
पृथिवीमौलिललामो यः प्रभवः पुरुषरत्नानाम् ॥ २ ॥

शूरे विदुषि च विभजन्दानं मानं च युगपदेकत्र ।
अविहितयाथातथ्यो जयति च **सत्याश्रयः**[1] सुचिरम् ॥ ३ ॥
पृथिवीवल्लभशब्दो येषामन्वर्थतां चिरं जातः ।
तद्वंशे (श्ये) षु जिगीषुषु तेषु बहुष्वप्यतीतेषु ॥ ४ ॥
नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे
नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे ।
लक्ष्मीर्भावितचापलादिव कृता शौर्येण येनात्मसा-
द्राजासीज्जयसिंहवल्लभ इति ख्यातश्चुलुक्यान्वयः ॥ ५ ॥
तदात्मजोऽभूद्रणरागनामा दिव्यानुभावो जगदेकनाथः ।
अमानुषत्वं किल यस्य लोकः सुप्तस्य जानाति वपुःप्रकर्षात् ॥६॥
तस्याभवत्तनूजः **पुलकेशी** यः श्रितेन्दुकान्तिरपि ।
श्रीवल्लभोऽप्ययासीद्वातापिपुरीवधूवरताम् ॥ ७ ॥
यत्त्रिवर्गपदवीमलं क्षितौ नानुगन्तुमधुनापि राजकम् ।
भूश्च येन हयमेधयाजिना प्रापितावभृथमज्जना बभौ ॥ ८ ॥
नलमौर्यकदम्बकालरात्रिस्तनयस्तस्य बभूव **कीर्तिवर्मा** ।
परदारविवृत्तचित्तवृत्तेरपि धीर्यस्य रिपुश्रियानुकृष्टा ॥ ९ ॥
रणपराक्रमलब्धजयश्रिया सपदि येन विरुग्णमशेषतः ।
नृपतिगन्धगजेन महौजसा पृथुकदम्बकदम्बकदम्बकम् ॥१०॥
तस्मिन्सुरेश्वरविभूतिगताभिलाषे
राजाभवत्तदनुजः किल **मङ्गलीशः** ।
यः पूर्वपश्चिमसमुद्रतटोषिताश्वः
सेनारजःपटविनिर्मितदिग्वितानः ॥ ११ ॥

---

१ 'सत्याश्रय' यह पुलकेशीका नामान्तर है ।

स्फुरन्मयूखैरसिदीपिका शतैर्व्युदस्य मातङ्गतमिस्रसंचयम् ।
अवाप्तवान् यो रणरङ्गमन्दिरे **कलच्चुरि**श्रीललनापरिग्रहम् ॥ १२ ॥

पुनरपि च जिघृक्षोः सैन्यमाक्रान्तसालं
रुचिरबहुपताकं **रेवती**द्वीपमाशु ।
सपदि महदुदन्वत्तोयसंक्रान्तबिम्बं
वरुणबलमिवाभूदागतं यस्य वाचा ॥ १३ ॥

तस्याग्रजस्य तनये नहुषानुभावे
लक्ष्म्या किलाभिलषिते **पुलकेशि**नाम्नि ।
सासूयमात्मनि भवन्तमतः पितृव्यं
ज्ञात्वापरुद्धचरितव्यवसायबुद्धौ ॥ १४ ॥

स यदुपचितमन्त्रोत्साहशक्तिप्रयोग-
क्षपितबलविशेषो **मङ्गलीशः** समन्तात् ।
स्वतनयगतराज्यारम्भयत्नेन सार्धं
निजमतनु च राज्यं जीवितं चोज्झति स्म ॥ १५ ॥

तावत्तच्छत्रभंगे जगदखिलमरात्यन्धकारोपरुद्धं
यस्यासह्यप्रतापद्युतिततिभिरिवाक्रान्तमासीत्प्रभातम् ।
नृत्यद्विद्युत्पताकैः प्रजविनि मरुति क्षुण्णपर्यन्तभागै-
र्गर्जद्भिर्वारिवाहैरलिकुलमलिनं व्योम या(जा)तं कदा वा ॥ १६ ॥

लब्ध्वा कालं भुवमुपगते जेतुमाप्यायिकाख्ये
गोविन्दे च द्विरदनिकरैरुत्तराम्भोधिरथ्याः ।
यस्यानीकैर्युधि भयरसज्ञत्वमेकः प्रयात-
स्तत्रावाप्तं फलमुपकृतस्यापरेणापि सद्यः ॥ १७ ॥

वरदातुङ्गतरङ्गरङ्गविलसद्धंसानदीमेखलां
वनवासीमवमृद्नतः सुरपुरप्रस्पर्धिनी संपदा ।
महता यस्य बलार्णवेन परितः संछादितोर्वीतलं
स्थलदुर्गं जलदुर्गतामिव गतं तत्तत्क्षणे पश्यताम् ॥१८

गङ्गाम्बु पीत्वा व्यसनानि सप्त हित्वा पुरोपार्जितसंपदोऽपि ।
यस्यानुभावोपनताः सदासन्नासन्नसेवामृतपानशौण्डाः ॥ १९ ॥

कोङ्कणेषु यदादिष्टचण्डदण्डाम्बुवीचिभिः ।
उदस्तास्तरसा **मौर्य**पल्वलाम्बुसमृद्धयः ॥ २० ॥

अपरजलधेर्लक्ष्मीं यस्मिन्पुरीं पुरभित्प्रभे
मदगजघटाकारैर्नावां शतैरवमृद्नति ।
जलदपटलानीकाकीर्णं नवोत्पलमेचकं
जलनिधिरिव व्योम व्योम्नः समोऽभवदम्बुधिः ॥ २१ ॥

प्रतापोपनता यस्य **लाटमालवगूर्जराः** ।
दण्डोपनतसामन्तचर्या वर्या इवाभवन् ॥ २२ ॥

अपरिमितविभूतिस्फीतसामन्तसेना-
मुकुटमणिमयूखाक्रान्तपादारविन्दः ।
युधि पतितगजेन्द्रानीकबीभत्सभूतो
भयविगलितहर्षो येन चाकारि हर्षः ॥ २३ ॥

भुवमुरुभिरनीकैः शासतो यस्य रेवा
विविधपुलिनशोभावन्ध्यविन्ध्योपकण्ठा ।
अधिकतरमराजत्स्वेन तेजोमहिम्ना
शिखरिभिरिभवर्ज्या वर्ष्मणां स्पर्धयेव ॥ २४ ॥

विधिवदुपचिताभिः शक्तिभिः शक्रकल्प-
स्तिसृभिरपि गुणौघैः स्वैश्च माहाकुलाद्यैः ।
अनमदधिपतित्वं यो **महाराष्ट्रकाणां**
नवनवतिसहस्रग्रामभाजां त्रयाणाम् ॥ २५ ॥

गृहिणां स्वगुणैस्त्रिवर्गतुङ्गा विहितान्यक्षितिपालमानभङ्गाः ।
अभवन्नुपजातभीतिलिङ्गा यदनीकेन स**कोसलाः कलिङ्गाः** ॥२६॥

पिष्टं पिष्टपुरं येन जातं दुर्गमदुर्गमम् ।
चित्रं यस्य कलेर्वृत्तं जातं दुर्गमदुर्गमम् ॥ २७ ॥

संनद्धवारणघटास्थगितान्तरालं
नानायुधक्षतनरक्षतजाङ्गरागम् ।
आसीज्जलं यदवमर्दितमभ्रगर्भा-
र्केणालमम्बरमिवोर्जितसांध्यरागम् ॥ २८ ॥

उद्धूतामलचामरध्वजशतच्छत्रान्धकारैर्बलैः
शौर्योत्साहरसोद्धितारिमथनैर्मौलादिभिः षड्विधैः ।
आक्रान्तात्मबलोन्नतिं बलरजःसंछन्न**काञ्चीपुरः**
प्राकारान्तरितप्रतापमकरोद्यः **पल्लवानां** पतिम् ॥ २९ ॥

कावेरी द्रुतशफरीविलोलनेत्रा **चोला**नां सपदि जयोद्यतस्तस्य (?) ।
प्रश्चद्योतन्मदगजसेतुरुद्धनीरा संस्पर्शं परिहरति स्म रत्नराशेः ॥ ३० ॥

चोलकेरलपाण्ड्यानां योऽभूत्तत्र महर्द्धये ।
पल्लवानीकनीहारतुहिनेतरदीधितिः ॥ ३१ ॥

उत्साहप्रभुमन्त्रशक्तिसहिते यस्मिन्समन्ताद्दिशो
जित्वा भूमिपतीन्विसृज्य महितानाराध्य देवद्विजान् ।

वातापीं नगरीं प्रविश्य नगरीमेकामिवोर्वीमिमां
चञ्चन्नीरधिनीरनीलपरिखां **सत्याश्रये** शासति ॥ ३२ ॥
त्रिंशत्सु त्रिसहस्रेषु भारतादाहवादितः ।
सप्ताब्दशतयुक्तेषु श (ग) तेष्वब्देषु पञ्चसु (३७३५) ॥३३ ॥
पञ्चाशत्सु कलौ काले **षट्सु पञ्चशतासु च** (६५६) ।
समासु समतीतासु **शकाना**मपि भूभुजाम् ॥ ३४ ॥
तस्याम्बुधित्रयनिवारितशासनस्य
सत्याश्रयस्य परमाप्तवता प्रसादम् ।
शैलं जिनेन्द्रभवनं भवनं महिम्नां
निर्मापितं मतिमता **रविकीर्तिने**दम् ॥ ३५ ॥
प्रशस्तेर्वसतेश्चास्या जिनस्य त्रिजगद्गुरोः ।
कर्ता कारयिता चापि **रविकीर्तिः** कृती स्वयम् ॥३६॥
येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां **रविकीर्तिः** कविताश्रित**कालिदासभारवि**कीर्तिः ३७

[प्राचीनलेखमाला, प्रथमभाग, ले० १६, पृ० ६८–७२, से उद्धृत]

[यह शिलालेख बीजापुर (पूर्वका कलादगी) ज़िलेके हुङ्गुण्ड तालुकाके ऐहोळेके मेगुटि नामके प्राचीन मन्दिरकी पूर्वकी तरफकी दीवालपर है। लेखमें कुल १९ पंक्तियाँ हैं, जिनमेंसे १८ वी पंक्ति पूर्ण और १९ वीं छोटी पंक्ति बादमें किसीकी जोड़ी हुई हैं और जिनमें महत्त्व-पूर्ण कोई बात नहीं है ।

समूचा शिलालेख किसी रविकीर्त्तिका बनाया हुआ है । वे (रविकीर्त्ति) चालुक्य पुलकेशी सत्याश्रय (अर्थात् पश्चिमी चालुक्य पुलकेशी द्वितीय) के राज्यमें थे । यह राजा उनका संरक्षक या पोषक था । इन्होंने शिलालेखवाले जिनालयमें जिनेन्द्रकी मूर्तिकी प्रतिष्ठा की । प्रतिष्ठाके समय यह लेख उत्कीर्ण करवाया गया था जिसमें सामान्यरूपसे चालुक्य वंशकी, और विशेषतः पुलकेशी द्वितीय (रविकीर्तिके आश्रयदाता) के

पराक्रमोंकी प्रशस्ति है । इस लेखमें आये हुए ऐतिहासिक तथ्योंका पूरा विवरण प्रो० भाण्डारकर और डा० फ्लीटने दिया है[1] ।

इस लेख (या काव्य) का मुख्य भाग १७-३२ श्लोकोंका है । इनको रविकीर्त्ति के आशयानुसार, रघुवंशके (चौथे सर्गके) रघुदिग्विजयके समान, 'पुलकेशी-सत्याश्रय दिग्विजय' कहा जा सकता है । इस काव्य (कविता) की रचनामें रविकीर्त्तिका कालिदासके रघुवंशका तथा भारविके किरातार्जुनीयका गहरा अध्ययन स्पष्ट काम कर रहा है; इसलिए उन्हींके शब्दोंमें उनका यह कथन कि 'स विजयतां रविकीर्तिः कविताश्रित-कालिदासभारवि-कीर्तिः' सचमुचमें ठीक है ।

श्लोक २२ में बताया गया है कि पुलकेशीका प्रताप इतना तेज था कि लाट, मालव और गूर्जर लोग अपने-आप ही उनकी शरण आते थे, बलपूर्वक नहीं ।]

[इं० ए०, जिल्द ५, पृ० ६७-७१]

१०९

लक्ष्मेश्वर—संस्कृत ।

—[?]—

जयत्यतिशयजिनैर्ब्भासुरस्सुरवन्दितः ।
श्रीमाञ्जिनपतिस्सृष्टेरादेः कर्त्ता दयोदयः ॥

देहहिसरि (इह हि स्वस्ति) ॥

चालुक्यपृथ्वीवल्लभकुलतिलकेषु बहुष्वतीतेषु **रणपराक्रमाङ्क**महाराजो भवत्तद्राजतनयः राजितनयो विवर्द्धितैश्वर्यश्चतुस्समुद्रान्तस्थाततुरङ्गेभपदातिसेनासमूहः **एर्रेय**नामधेयः श्रीमान् ॥

---

१ देखो प्रो० भाण्डारकरकी Early History of the Dekkan, 2nd ed., especially p. 51; और डॉ० फ्लीटकी Dynasties of the Kanarese Districts, 2nd ed. especially p. 349 ff.

अपि च ॥

शासतीमां समुद्रान्तां वसुधां वसुधाधिपे ।
सत्याश्रयमहाराजे राजत्सत्यसमन्विते ॥

भुजगेन्द्रान्वय**सेन्द्रा**वनीन्द्रसन्ततौ अनेकनृपसत्तमेश्वतीतेषु तत्कुल-गगनचन्द्रमाः बहुसमरविजयलब्धपताकावभासितदिगन्तरालवलयः **विजयशक्ति**र्न्नाम नृपतिर्ब्बभूव [॥] तत्सूनुरुदिततरुणदिवाकरकरसम-प्रभः सौ (शौ)र्य्य-धैर्य्य-सत्त्व-गुणोपपन्नः सामन्तबृ(वृ)न्दमौलि-मालवलीढचरणः **कुन्दशक्ति**र्न्नाम राजाभूत् तस्य प्रियतनयः ॥ अद्वि-तीयपुरुषकारसम्पन्नः । धर्म्मार्थकामप्रधानः अनेकरणविजयवीरपताका-ग्रहणोद्धतकीर्त्तिः [॥] तेन **दुर्ग्गशक्ति**नामधेयेन **शङ्खजिनेन्द्र**चैत्यनित्य-पूजार्थं पुण्याभिवृद्धये च **पुलिगेरे**-नामनगरस्योत्तरपार्श्वे पञ्चाशन्नि-वर्त्तनपरिमाणक्षेत्रं दत्तम् ॥ तस्य सीमा समाख्यायते [।] पूर्व्वतः **किन्न-रीक्षेत्रम्** । पावकदिशि **ज्येष्ठलिङ्ग**भूमिः । दक्षिणतः **घटिका**क्षेत्रम् । नैर्ऋत्यां दिशि **दं** (**ं पं**)-**डीस** (**श**) श्रेष्ठिभूमिः । पश्चिमतः **रामे-श्वर**क्षेत्रम् वायव्यां **होनेश्वर**क्षेत्रम् । उत्तरतः **सिन्देश्वर**क्षेत्रं ई (ऐ) शान्यां दिशि **भट्टारी**क्षेत्रम् । तदक्षिणतः पूर्व्वोक्त**किन्नरी**क्षेत्रम् ॥

देवस्वं विषं लोके न विषं नं[2] (?) विषमुच्यते ।
विषमेकाकिनं हन्ति देवस्वं पुत्र-पौत्रिकम् ॥

[यह लेख, जिसमें उस बड़े शिलालेख (नं. १४९) का दूसरा भाग (पंक्तियाँ ५१-६१) निहित है, 'सेन्द्र' कुलका लेख है ।

---

१ यहाँ 'क' की जगह 'म' भी हो सकता है और तब 'मन्दशक्ति' पढ़ा जायगा । २ यह 'न' अतिरिक्त है और भूलसे जुड़ गया है ।

इसका प्रारम्भ 'रणपराक्रमाङ्क' नामके एक चालुक्य राजा और उसके पुत्र एरेंय्यके उल्लेखसे हुआ है। लेकिन ये दोनों नाम पश्चिमी या पूर्वी चालुक्योंमेंसे किसीकी भी वंशावलीमें अभीतक नहीं मिले हैं। रणपराक्रमाङ्क शायद 'रणराग'के लिये उल्लेखित हुआ है, जो जयसिंह प्रथमका पुत्र और पुलिकेशी प्रथमका पिता था। जयसिंह प्रथमका जो दक्षिणके इस वंशके प्रथम पुरुष हैं, वर्णन कभी-कभी आता है।

इसके अनन्तर 'सत्याश्रय' नामके एक राजाका उल्लेख आता है। परन्तु उससे यह पता नहीं चलता कि इस उपाधि (सत्याश्रय) को धारण करनेवाले किस पश्चिमी चालुक्य राजासे मतलब है।

इसके बाद, सत्याश्रयके समकालवर्तीके तौरपर, 'दुर्गशक्ति' राजाका उल्लेख आता है। यह राजा 'भुजगेन्द्र' अर्थात् नागवंशके अन्वयसे सम्बन्ध रखनेवाले सेन्द्र राजाओंके वंशका था। यह विजयशक्तिके पुत्र कुन्दशक्तिका पुत्र था।

इसमें दुर्गशक्तिके द्वारा शङ्खजिनेन्द्र नामके चैत्यके लिये दिये गये भूमिदानका कथन है। यह भूमिदान पुलिगेरे नगरमें किया गया था।

लेखका काल नहीं दिया गया है। यह संभवतः प्राचीनतर कालका मालूम पड़ता है, जो यहाँ सिर्फ पूर्वकालके लेखके निश्चय या सुरक्षाके लिये ही दुहराया गया है।]

[इं० ए०, जिल्द ७, पृ० १०१-१११, नं० ३८ (पंक्तियाँ ५१-६१)]

११०

[यह लेख श्रवण-बेलगोलाका संस्कृत और कन्नडमें है। इसे 'जैन शिलालेख-संग्रह प्रथम भाग' में देखना चाहिये।]

[L. Rice, EC, II, sr.-Bel. ins. no. 24.]

१११

लक्ष्मेश्वर—संस्कृत।

[शक ६०८=ई० सन् ६८७]

[यह लेख (मूल) इलियटके हस्तलिखितसंग्रहकी पहली जिल्दमें पृष्ठ २२ पर दिये गये ८७ पंक्तिवाले एक लेखका चौथा भाग है और पंक्ति ६९

वींसे शुरू होता है। उस समस्त लेखका सिर्फ कुछ भाग ही उस पुस्तकमें पाषाण-लेखपरसे लिया गया है, पूरा लेख नहीं। इसलिये उस लेखका यहाँ देना मुश्किल होनेसे सिर्फ उसकी विगत यहाँ दी जाती है।

उस विशाल लेखकी ६९ वीं पंक्तिसे एक दूसरा पश्चिमी चालुक्य शिलालेख शुरू हो जाता है। इस लेखकी ६९ से ८२ तककी पंक्तियाँ यद्यपि अस्पष्ट हैं, फिर भी अति सुरक्षित हैं; उसके नीचेकी पाँच पंक्तियोंका भी कुछ निशानोंसे पता चल जाता है, यद्यपि अक्षर इतने घिसे हुए हैं कि पढ़नेमें नहीं आते। इसमें पो(पु)लिकेशीवल्लभसे लेकर विनयादित्य-सत्याश्रय तककी वंशावली है और मूलसङ्घ अन्वयकी देवगण शाखाके किसी आचार्यको, उसके द्वारा दिये गये, दानका उल्लेख है। यह दान ६०८ शक वर्षके बीतनेपर जब उसके राज्यका पाँचवाँ या सातवाँ वर्ष चालू था और जब उसकी विजयका कैम्प (विजयस्कन्धावार) रक्तपुर नगरमें लगा हुआ था, माघ महीनेकी पूर्णमासीको दिया गया था। यह काल ७७-७८ पंक्तियोंमें यों दिया हुआ है:—अष्टोत्तर-षट्-छतेसु शकवर्षेष्वतीतेषु प्रवर्द्धमानविजयराज्यपञ्चम-(? सप्तम)-संवत्सरे श्री रक्तपुरमधिवसति विजयस्कन्धावारे माघमासे पौर्णमास्याम्। यहाँ वार (दिन) नहीं दिया हुआ है।]

[इं० ए० ७, पृ० ११२, नं० ३९, चतुर्थभाग]

११२

श्रवणबेलगोला (विना कालका)-कन्नड़।

(देखो "जैन शिलालेख संग्रह प्रथम भाग"।)

११३

लक्ष्मेश्वर—संस्कृत।

[शक ६५१=ई० सन् ७२९]

[यह लेख (मूल) इलियटके हस्तलिखित संग्रह (Elliot's Ms. Collection) की पहली जिल्दमें पृष्ठ २२ पर ८७ पंक्तिके एक बड़े लेखमें दिया हुआ है। उसमेंसे पंक्ति २८ से शुरू होकर पंक्ति ५३ तक

पश्चिमी चालुक्योंका शिलालेख है। इसमें पो (पु) लिकेशीवल्लभ, अर्थात् पुलिकेशी प्रथमसे लेकर विजयादित्य सत्याश्रय तककी वंशावली दी हुई है तथा यह भी उल्लेखित है कि अपने राज्यके चौतीसवें वर्षमें जब कि शक संवत्के ६५१ वर्ष व्यतीत हो चुके थे फाल्गुनकी पूर्णिमाके दिन, जब कि उसका विजय-स्कन्धावार रक्तपुर नगरमें था, पुलिकर नगरकी दक्षिण सीमापर बसे हुए कर्दम गाँवका दान अपने पिताके पुरोहित उदयदेव पण्डितको, जिन्हें 'निरवद्यपण्डित' भी कहते थे, दिया। ये श्रीपूज्यपादके शिष्य थे तथा मूलसंघ अन्वयकी देवगण शाखाके थे। यह दान पुलिकर नगरमें शङ्ख-जिनेन्द्रके मन्दिरके हितार्थ दिया गया था। कालनिर्देश पंक्ति ४२–४४ में यों दिया हुआ है:—एकपञ्चाशदुत्तरषट्छतेषु शकवर्षेष्वतीतेषु प्रवर्त्तमान-विजयराज्यसंवत्सरे चतुस्त्रिंशे वर्त्तमाने श्री-रक्तपुरमधिवसति विजयस्कन्धावारे फाल्गुनमासे पौर्णमास्याम्। वार (दिन) इसमें नहीं दिया हुआ है।]

[इं० ए०, ७, पृ० ११२, नं० ३९ (द्वितीय भाग)]

११४

लक्ष्मेश्वर—संस्कृत।

[शक ६५६=७३४ ई०]

स्वस्ति [॥]

जयत्यावि:कृतं **विष्णो**र्व्वाराहं क्षोभितार्ण्णवं।
दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः॥

श्रीमतां सकलभुवनसंस्तूयमान**मानव्य**सगोत्राणां **हारीति**-पुत्राणां सप्तलोकमातृभिः सप्तमातृभिरभिवर्द्धितानां **कार्त्तिकेय**परिरक्षणप्राप्तकल्याणपरम्पराणां भगव**न्नारायण**प्रसादसमासादित**वराह**लाञ्छनेक्षणवशीकृताशेषमहीभृतां **चालुक्यानां** कुलमलंक्करिष्णोरश्वमेधावभृथस्नानपवित्रीकृतगात्रस्य **श्रीपोलिकेशीवल्लभ**महाराजस्य प्रियसूनुः **श्रीकीर्त्तिवर्म्म**पृथ्वीवल्लभमहाराजस्तस्यात्मजस्य **सत्याश्रय**श्रीपृथ्वीवल्लभमहा-

राजाधिराजपरमेश्वरस्य प्रियतनयः (यस्य) प्रभावकुलिशदलित**पाण्ड्य-चोल-केरल-कदम्ब**प्रभृतिभूभृदुदग्रविभ्रमस्य नित्यावनत**काञ्ची**पतिमुकुटचुम्बितपादाम्बुजस्य **विक्रमादित्यसत्याश्रय**श्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरस्य प्रियसूनुः (नोः) सकलोत्तरापथनाथमथनोपार्ज्जितपालिध्वजादिसमस्तपारमैश्वर्यचिह्नस्य **विनयादित्यसत्याश्रय**श्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारकस्य प्रियात्मजः साहसरसरसिकः पराङ्मुखीकृतशत्रमण्डलस्सकलपारमैश्वर्यव्यक्तिहेतुपालिध्वजाद्युज्व (ज्ज्व)लराज्यचिह्नो **विजयादित्यसत्याश्रय**श्रीपृथ्वीवल्लभमहाराजाधिराज(जः) [॥] [तत्-]प्रियसूनोः प्रतिदिनप्रवर्द्धमानया(यौ)वनो (नस्य) रिपुमण्डलाक्रान्तिराज्याभ्युदयः (यस्य) कस्तूरीकिशोरविक्रमैकरसो (सस्य) **विक्रमादित्यसत्याश्रय**श्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरभट्टारकस्य विजयस्कन्धावारे **रक्तपुर**मधिवसति **षट्पञ्चाशदुत्तरषट्च्छतेषु शकवर्षेष्वतीतेषु प्रवर्द्धमानविजयराज्यसंवत्सरे द्वितीये वर्त्तमाने माघपौर्ण्णमास्यां मूलसंघान्वयदेवगणो**दितः (ताय) परमतप(पः)श्रुतमूर्त्तिविशे(शो)क**रामदेवाचार्य्य**शिष्यो (ष्याय) विजितविपक्षवादि**जयदेवपण्डित**ान्तेवासी (सिने) समुपगतैकवादित्वादि**श्रीविजयदेवपण्डिताचार्य्याय** जिनपूजाभिवृद्ध्यर्थं बाहुबलिश्रेष्ठिविज्ञापनेन **पुलिकर**नगरस्य **शङ्खतीर्थवसते**र्म्मण्डनमण्डितं तस्य **धवलजिनालय**स्य जीर्ण्णोद्धारणं कृत्वा खण्डस्फुटितनवसंस्कारबलिनिमित्तं दानशीलादिप्रवर्त्तनार्थं नगरादुत्तरस्यां दिशि गव्यूतिप्रमाण-व्यवस्थितं **कर्प्पटि**तटाकादक्षिणस्यां दिशि राजमानेन शतार्द्धनिवर्त्तनप्रमाणक्षेत्रं सर्व्वबाधापरिहारं दत्तम् [॥] तस्य सीमा समाख्यायते । पूर्व्वदिशि तत्साधितकिन्नरपाषाणादक्षिणस्यामाशायां धवलपाषाणपार्श्व-

शम्यः । पश्चिमस्यां दिशि **श्वेतपाषाणा**देकशमी उत्तरस्यां दिशि **आनीलपाषाणा**त् प्राक्प्रकाशिततटाकात् पूर्व्वस्यां दिशि **अरुणपाषाणा**त् पूर्व्वोक्तव्यक्त**किन्नरपाषाण**संगता सीमा ॥

स्वं दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम् ।
दानात्पालनाच्चेति (दानं वा पालनं चेति) दानाच्छ्रेयोऽनुपालनम् ॥

न विषं विषमित्याहुः देवस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति देवस्वं पुत्र-पौत्रिकम् ॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टि-वर्षसहस्राणि विष्ठायां जायते कृमिः ॥

प्रथ्यताम् जिनशासनम् [॥]

[इं० ए०, जिल्द ७, पृ० १०१–१११, नं० ३८ (पंक्तियाँ ६१–८२)]

[यह लेख उस बड़े लेख (नं. १४९) का तीसरा व अन्तिम भाग (पंक्तियाँ ६१-८२ तक) है। यह पश्चिमी चालुक्य विक्रमादित्य द्वितीय-का लेख है। यह उसके राज्यके द्वितीय वर्षका है जब कि शक वर्ष ६५६ (७३४-५ ई०) व्यतीत हो चुका था, और फलतः पूर्व किसी लेख (शिला-लेख या ताम्रपत्र) से यहाँ निश्चय या सुरक्षाके लिये दुहराया गया है। यह लेख उसकी छावनी 'रक्तपुर' से निकाला गया है। 'रक्तपुर' आज-कलका कौन-सा स्थान है, यह नहीं कहा जा सकता।

इसमें 'पुलिकर'—पूर्वके दो शिलालेखोंका 'पुलिगेरे'—शहरकी 'शङ्ख-तीर्थवसति' तथा 'धवलजिनालय' नामके एक दूसरे मन्दिरकी सजावट तथा मरम्मतका उल्लेख है और कहा गया है कि 'जिन' की पूजाके प्रबन्धके लिये कुछ भूमिदान किया गया।

यह लेख अपने वंशावली-परिचायक भागमें पश्चिमी चालुक्योंके शिला-लेखोंसे मिलता है। इसमें दो आगेकी पीढ़ियोंका—विजयादित्य और विक्र-मादित्य द्वितीयका, जो विनयादित्यके क्रमशः पुत्र और पौत्र हैं,—भी उल्लेख है।]

११५

पञ्चपाण्डवमलै—(आर्कटके निकट)–तामिल

—[?]—

१. **नन्दिप्पोत्तरश**[ै] क्कु अय् [म्] बदावदु **नाग[ण]न्दि-**
गुर [वर्]

२. [इरु] क्क **पोञ्जिय [क्] किय[ा]र्** पडिमं कोट्टुधिट्टा [ञ्]

३. **पु[ग]ळालैमंग[ल]त्तु** मरुत्तुवर् मगञ् **नारण-**

४. ञ् [॥]

अनुवाद—नन्दिप्पोत्तरशर्के ५ वें (वर्ष) में,—पुगळालैमङ्गलंके मरुत्तुवरके पुत्र नारणञ् (नारायण) ने नागणन्दि (नागनन्दि) गुरुकी मूर्तिके साथ-साथ पोञ्जियक्कियार्की मूर्ति खुदवाई ।

[El, IV, no. 14, A.]

११६

अनहिलवाड-पाटन—संस्कृत ।

(संवत् ८०२= ई० स० ७४५)

यह शिलालेख श्वेताम्बर सम्प्रदायका है ।

[J. Burgess and H. Cousens, Antiquity of North Gujerat (A SI, XXXII).]

११७

श्रवणबेलगोला (विना कालका)—संस्कृत ।

[देखो "जैन शिलालेख-संग्रह प्रथम भाग" ।]

११८

नन्दी (गोपीनाथ पर्वत)—संस्कृत ।

विना कालनिर्देशका [=संभवतः ७५० ई० (लु० राइस)

[नन्दीमें, गोपीनाथ पहाड़ीके ऊपर गोपालस्वामी मन्दिरके पासकी चट्टानपर]

स्वस्ति श्रीमत् जितं भगवता जिनवर-वृषभेण वृषभेण पुरा कलि-अवसर्पिण्यां द्वावरे युगे लोक-स्थितिरक्षार्त्थं काङ्क्षित-मनुष्य-जन्मना पुरुषोत्तमेन सूर्य्य-वंश-व्योम-सूर्य्येण महारथेन दाशरथिना **राम-स्वामिना** प्रतिष्ठापिताय भगवतोर्हतः परमेष्ठिनः सर्व्वज्ञस्य चैत्य-भवनाय पश्चात् पाण्डवजनन्या **को(कु)न्तिदेव्या** पुनर्न्नवीकृत-संस्काराय भूमिदेव्या-स्तिलकायमानाय स्वर्ग्गापवर्ग्ग-पदयोस्सोपान-पदवीभूताय धराधर-धरणेन्द्रस्य फणा-मणि-लीलानुकारिणे धराधरवराय जिनेन्द्र-चैत्य-सान्निध्यात् पावनाय परम-तीर्त्थाय तपश्चरण-परायण-महर्षि-गणाध्यासित-कन्दराय **श्रीकुन्दा**ख्याय (यहाँ बन्द हो जाता है)

[वृषभ-देवको नमस्कार करनेके बाद,—

प्राचीन समयमें, कलि-अवसर्प्पिणीके द्वापर-युगमें, सूर्यवंशके गगनमें सूर्यके समान, दशरथके पुत्र महारथ राम-स्वामी (रामचन्द्रजी)के द्वारा अर्हन्त-परमेष्ठीका यह चैत्य-भवन प्रतिष्ठापित किया गया । बादमें, पाण्डवोंकी माता कुन्तीने इसे फिरसे नया बनवा दिया ।

भूमिदेवीको तिलकके समान, स्वर्ग और अपवर्ग दोनोंके लिये सीढ़ी, सब पर्वतोंमें उत्तम, जिनेन्द्र-चैत्य (बिम्ब)के सान्निध्यसे पवित्रीकृत, परमतीर्थ, जिसमें जगह-जगह तपश्चरण-परायण महर्षिगणोंके लिये कन्दराएँ (गुफायें) बनी हुई हैं, ऐसा 'श्रीकुन्द' नाम पर्वत (यहाँ लेख खतम हो जाता है ।[1])

[EC, X, Chik-ballapur tl., no. 29.]

११९

बेलवत्ते—कन्नड़ ।

विना काल-निर्देशका (संभवतः लगभग ७५० ई०)

[बेलवत्ते-मैसूर तालुकेमें, बसवेश्वर मन्दिरके पश्चिमकी ओर]

नेर्रेयर्दि एर्दनु मुने·····ळलियु प्रभिन्न-वाग्वि बिल्लोरु गुर्रि····

---

१ प्रारम्भके शब्द 'स्वस्ति' को यहाँ अन्तमें लगा देनेसे यह लेख संभाव्य-रूपसे पूर्ण समझा जा सकता है, क्योंकि 'स्वस्ति'के योगमें चतुर्थी विभक्ति होती है, जो यहाँ है ।

दुं एल्दु दवे तम्म क्षेमकिरदल्लि मेच्चिर ताव्वदु परत्रे यपुदेवदेरू महा-प्रभु-**गोवपय्यन्** इन्त् इळ्दपु समाधियोळे मुडिपि ताळ्दिदन्नितमरेन्द्र-भोगमं ॥ पदेदोम् **श्री-पुरुषय्यल्** आम्मु-मोदलोळ् कल्नाडन् अन्दों बळेक् एदेयोळ् अक्कुडु भूतिमूतुगानो दोत धाण धीक्षे सळे पडेदे···· पितृ-कळत्र-मित्र-जनमं काव्यान्य ताळ्द् अप्पोडी-नुडियल् वेल्कुमे पेम्पन् ओप्प गुणते तोळमिकिळ्द गोपय्यनम् ॥

[महाप्रभु गोवपय्यको श्रीपुरुषकी तरफसे भूमि-दान मिला था और वे (गो. प.) समाधिमरणपूर्वक मरे थे ।]

[EC, III, Mysore tl., no. 6]

१२०

देवलापुर—कन्नड़ ।

विना कालनिर्देशका (संभवतः लगभग ७५० ई०)

[देवलापुर (कूडनहल्लि तालुका), मारीगुडीके पूर्वमें]

स्वस्ति **श्रीपुरुष**-महा·····पृथुवी-राज्यकेये **अरट्टि**····रम्मगन्दिर् **सिंगं** दीक्षे बीळादु **अरट्टि-तीर्र् कुडलूरद** गोट्टे **मडिओडे**-यम्बर् आळ्विकय

(पृष्ठभागपर)

नोक्कज-ओडे आगद्दीकड·····कोट्ट नेल तेनेन्धक काळेर्रुकु साक्षी कुडलू पोङ्गुलरुं एळमडियरुं एळिरियरुं मदुगरुं कागब्बरुं साक्षि आग कोट्टदु आळ् आळ् किडिशिदोन वारणासिया शासिर-कविले शासिर-पार्वर् कोन्द कोले आक्का कोडिशिदोनु·····कडुवेडिळोनुडि तेन्ने··· ळिद स्वचोनु····अरट्टिग तळर कुडलूर् आव्वत्ति

[जिस समय इस पृथ्वीपर श्री-पुरुष महाराज राज्य कर रहे थे;— अरट्टि·····के पुत्र सिंगम् के (जिन) दीक्षा लेनेके बाद, (उसकी मां) अरट्टितिने कुडलर् किलेके मडि-ओडेके द्वारा शासित प्रदेशमें भूमिदान किया ।]

[EC, III, Mysore tl., no. 25.]

१२१

देवरहल्लि—संस्कृत तथा कन्नड़ ।

शक सं० ६९८=७७६ ई०

[देवरहल्लि (देवलापुर प्रदेश)में, पटेल कृष्णय्यके ताम्रपत्रोंपर]

(Ib) स्वस्ति जितं भगवता गतघनगगनाभेन पद्मनाभेन श्रीमज्जाह्नवेयकुलामलव्योमावभासनभास्करः स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषणभूषितः काण्वायन-सगोत्रः श्रीमत्**कोङ्गणिवर्म्मधर्म्ममहाधिराजः** तस्य पुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तिः सम्यक्प्रजापालनमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चननिकषोपलभूतो नीतिशास्त्रस्य वक्तृ-प्रयोक्तृकुशलो **दत्तकसूत्रवृत्तेः** प्रणेता श्रीमान् **माधवमहाधिराजः** तत्पुत्रः पितृपैतामहगुणयुक्तोऽनेकचातुर्द्दन्तयुद्धावाप्तचतुरुदधिसलिलास्वादितयशः श्रीमद्**दुरिवर्म्ममहाधिराजः** तस्य पुत्रो द्विजगुरुदेवतापूजनपरो (IIa) नारायणचरणानुध्यातः श्रीमान् **विष्णुगोपमहाधिराजः** तत्पुत्रः त्र्यम्बकचरणाम्भोरुहरजःपवित्रीकृतोत्तमाङ्गः स्वभुजबलपराक्रमक्रयक्रीतराज्यः कलियुगबलपङ्कावसन्नधर्म्मवृषोद्धरणनित्यसन्नद्धः श्रीमान् **माधवमहाधिराजः** तत्पुत्रः श्रीमत्कदम्बकुलगगनगभस्तिमालिनः **कृष्णवर्म्ममहाधिराजस्य** प्रियभागिनेयो विद्याविनयातिशयपरिपूरितान्तरात्मा निरवग्रहप्रधानशौर्यो विद्वस्तु ? (विद्वत्सु) प्रथमगण्यः श्रीमान्

कोङ्गणिमहाधिराजः अविनीतनामा तत्पुत्रो विजृम्भमाणशक्तित्रयः **अन्दरि-आलत्तूर्-प्पोरुळर्रे-पेल्लनगरा**द्यनेकसमरमुखमखहुतंप्रहतशूर-पुरुषपशूपहारविघसविहस्तीकृतकृतान्ताग्निमुखः किरातार्जुनीयपञ्चदश-सर्ग- (IIb) टीकाकारो **दुर्व्विनीत**नामधेयः तस्य पुत्रो दुर्द्दान्तविमर्द्दविमृदितविश्वम्भराधिपमौलिमालामकरन्दपुञ्जपिञ्जरीक्रियमाणचरण-युगलनलिनो **मुष्कर**नामधेयः तस्य पुत्रश्चतुर्द्दशविद्यास्थानाधिगत-विमलमतिः विशेषतोऽनवशेषस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो रिपुति-मिरनिकरनिराकरणोदयभास्करः **श्रीविक्रम**प्रथितनामधेयः तस्य पुत्रः अनेकसमरसम्पादितविजृम्भितद्विरदरदनकुलिशाघात-व्रणसंरूढभास्वद्वि-जयलक्षणलक्ष्मीकृतविशालवक्षस्थलः समधिगतसकलशास्त्रार्थतत्त्वस्समा-राधितत्रिवर्गो निरवद्यचरितर् प्रतिदिनमभिवर्द्धमानप्रभावो **भूविक्रम**-नामधेयः

अपि च—

नानाहेतिप्रहारप्रविघटितभटोरष्कवाटोत्थितास्रग्-
धारास्वाद-प्र(IIIa) मत्तद्विपशतचरणक्षोदसम्मर्द्दभीमे ।
संग्रामे **पल्लवेन्द्रं** नरपतिमजयद्यो **विळन्दा**-भिधाने
राज-श्रीवल्लभाख्यस्समरशतजयावाप्तलक्ष्मीविलासः ॥
तस्यानुजो नंतनरेन्द्रकिरीटकोटि-
रत्नार्कदीधितिविराजितपादपद्मः ।
लक्ष्म्या स्वयम्वृतपतिर्न्नवकाम**नामा**
शिष्टप्रियोऽरिगणदारणगीतकीर्त्तिः ॥

तस्य **कोङ्गणिमहाराजस्य शिवमारा**परनामधेयस्य पौत्रः सम-वनतसमस्तसामन्तमुकुटतटघटितबहलरत्नविलसदमरधनुष्खण्डमण्डितच-

रणनखमण्डलो नारायण[चरण]निहितभक्तिः शूरपुरुषतुरगनरवारणघटासंघट्टदारुणसमरशिरसि निहितात्मकोपो भीमकोपः प्रकटरतिसमयसमनुवर्त्तनचतुरयुवतिजनलोकधूर्त्तोऽलोकधूर्त्तः सुदुर्द्धरानेकयुद्धमूर्धलब्धविजयसम्पद हितगजघ (IIIb) टाकेसरी राजकेसरी। अपि च।

यो गङ्गान्वयनिर्म्मलाम्बरतलव्याभासनप्रोल्लसन-
मार्त्तण्डोऽरिभयङ्करः शुभकरस्सन्मार्गरक्षाकरः।
सौराज्यं समुपेत्य राज्यसमितौ राजन् गुणैरुत्तमै-
राज-**श्रीपुरुष**श्चिरं विजयते राजन्य-चूडामणिः॥
कामो रामासु चापे दशरथतनयो विक्रमे जामदग्न्यः
प्राज्यैश्वर्ये बलारिर्ब्बहुमहसि रविस्स्व-प्रभुत्वे धनेशः।
भूयो विख्यातशक्तिस्स्फुटतरमखिलं प्राणभाजं विधाता
धात्रा सृष्टः प्रजानां पित(पति)रिति कवयो यं प्रशंसन्ति नित्यं॥

तेन प्रतिदिनप्रवृत्तमहादानजनितपुण्याहघोषमुखरितमन्दिरोदरेण **श्रीपुरुष**प्रथमनामधेयेन **पृथुवीकोङ्गणिमहाराजेन** अष्टानवत्युत्तरे-[षु] षट्च्छतेषु शकवर्षेष्वतीतेष्वात्मनः प्रवर्द्धमानविजयैश्वर्य्ये संवत्सरे पञ्चाशत्तमे प्रवर्त्तमाने **मान्यपुर**मधिव-(IVa)सति विजयस्कन्धावारे श्रीमूल-मूलगणाभिनन्दित**नन्दिसङ्घान्वये एरेगित्तू**र्न्नाम्नि गणे **पुलिकल्**गच्छे स्वच्छतरगुणकिर[ण]प्रततिप्रह्लादितसकललोकः चन्द्र इवापरः **चन्द्रनन्दी**नाम गुरुरासीत् तस्य शिष्यस्समस्तविबुधलोकपरिरक्षणक्षमात्मशक्तिः परमेश्वरलालनीयमहिमा कुमारवद्वितीयः **कुमार-ण(न)न्दी** नाम मुनिपतिरभवत् तस्यान्तेवासी समधिगतसकलतत्त्वार्थसमर्थितबुधसार्थसम्पत्सम्पादितकीर्त्तिः **कीर्त्त(र्त्ति)नन्द्याचार्यो** नाम महामुनिस्समजनि तस्य प्रियशिष्यः शिष्यजनकमलाकरप्रबोधनकः

मिथ्याज्ञानसन्ततसन्तमससन्तानान्तकसद्धर्मव्योमावभासनभास्करः **विमलचन्द्राचार्य**स्समुदपादि तस्य (IV b) महर्षेर्द्धर्म्मोपदेशनया श्रीमद्द्राणकुलकलः सर्व्वतपमहानन्दीप्रवाहः महादण्डमण्डलाग्रखण्डितारिमण्डलद्रुमषण्डो **दुण्डु**प्रथमनामधेयो **नीर्गुन्द**युवराजो जज्ञे तस्य प्रियात्मजः आत्मजनितनयविशेषनिःशेषीकृतरिपुलोकः लोकहितमधुरमनोहरचरितः चरितार्थत्रिकरणप्रवृत्तिः **परमगूळ**प्रथमनामधेयश्री**पृथुवीनीर्गुन्दराजो**ऽजायत पल्लवाधिराजप्रियात्मजायां सगरकुलतिलकात् **मरुवर्म्म**णो जाता **कुन्दाच्चि**नामधेया भर्तृभवन आबभूव भार्य्या तया सततप्रवर्त्तितधर्म्मकार्य्यया निर्म्मिताय **श्रीपुरो**त्तरदिशमलङ्कुर्व्वते **लोकतिलक**नाम्ने **जिनभवनाय** खण्डस्फुटितनवसंस्कारदेवपूजादानधर्म्मप्रवर्त्तनार्थं तस्यैव **पृ**(Va)**थिवीनीर्गुन्दराज**स्य विज्ञापनया महाराजाधिराजपरमेश्वरश्री**जसहितदेवेन** नीर्गुन्दविषयान्तर्पाति **पोन्नळ्ळि**नामग्रामस्सर्व्वपरिहारोपेतो दत्तः तस्य सीमान्तराणि पूर्व्वस्यां दिशि नोलिबेळदा बेळगल्-मोर्रादि पूर्व्वदक्षिणस्यां दिशि पण्यङ्केरी दक्षिणस्यां दिशि बेळगल्लिगेर्रेया ओळगेर्रेया पल्लदा कूडळ् दक्षिणपश्चिमायान्दिशि जैदरा केय्या बेळगल्-मोर्रडु पश्चिमायान्दिशि पोङ्केवि तालुवायराकेरी पश्चिमोत्तरस्यां दिशि पुणुसेया गोट्टेगाला कल्कुप्पे उत्तरस्यां दिशि सामगेरेया पोल्लदा पेर्म्मुरिक्कु उत्तरपूर्वस्यां दिशि कळम्बेत्ति-गट्टु इमान्यन्यानि क्षेत्रान्तराणि दत्तानि दुण्डुसमुद्रदा वयलुळ् किर्रुदार्रामेगे **पदिर्क्कण्डुगं** मण्णं **पळेया एरेनल्लूरा** ऊर्प्पाळु ओर्क्कण्डुगं **श्रीवुरदा दु** (Vb) **ण्डुगामुण्डरा** तोण्टदा पडुवायोन्दुतोण्ट श्रीवुरदा वयलुळ् कर्म्मग्गट्टिनल्लि इर्क्कण्डुगं कळनि पेग्गेर्रेया केळगे आर्रुगण्डुगमेरे पुलिगेर्रेया कोयिलगोडा एडे इर्प्पत्तुगण्डुगं ब्बेडे आदुवु श्रीवुरदा बडगण पडुवण कोणुळळ्ण् **देवङ्केरि** मदमने ओन्दं

मूवत्ता-ओन्दु मनेय मनेताणमस्य दानसाक्षिणः अष्टादश प्रकृतयः ॥ (VIa) अस्य दानस्य साक्षिणः **षण्णवतिसहस्र**विषयप्रकृतयः योऽस्यापहर्त्ता लोभात् मोहात् प्रमादेन वा स पञ्चभिर्म्महद्भिः पातकैस्संयुक्तो भवति यो रक्षति स पुण्यभाग्भवति अपि चात्र मनु-गीताः श्लोकाः

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥
स्वं दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम् ।
दानं वा पालन वेति दानाच्छ्रेयोनुपालनम् ॥
बहुभिर्व्वसुधा भुक्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् ॥
देवस्वं तु विषं घोरं न विषं विषमुच्यते ।
विषमेकाकिनं हन्ति देवस्वं पुत्र-पौत्रकम् ॥

सर्व्वकलाधारभूतचित्रकलाभिज्ञेन . **विश्वकर्म्माचार्य्येण**दं शासनं लिखितं चतुष्कण्डुकव्रीहिबीजावापमात्रं द्विकण्डुककक्षुक्षेत्रं तदपि ब्रह्मदेयमिव रक्षणीयम् ॥

[इस लेखमें सर्वप्रथम गङ्गनरेशोंकी राजपरम्परा बताई गई है। वह निम्न भाँति थीः—

१ काण्वायनसगोत्रीय कोङ्गणिवर्म्म-धर्म्म-महाराजाधिराज ।
इनके पुत्र—
२ माधव-महाधिराज; ये दत्तकसूत्र-वृत्ति (टीका)के प्रणेता थे ।
इनके पुत्र—
३ हरिवर्म्म-महाधिराज ।
इनके पुत्र—
४ विष्णुगोप-महाधिराज ।
इनके पुत्र—

५ माधव-महाधिराज। इनके पुत्र—

६ कदम्बकुलके सूर्य कृष्णवर्म्म महाधिराजकी बहिनके पुत्र अविनीत नामके कोङ्गणि-महाधिराज थे। इनके पुत्र—

७ दुर्व्विनीत थे। इन्होंने अन्दरि, आलत्तूर्, पोरुलर्रे, पेल्लनगर तथा और भी अन्य जगहोंके युद्धोंको जीता था। ये किरातार्जुनीय संस्कृत काव्यके १५ सर्गों तकके टीकाकार भी थे। इनके पुत्र—

८ मुष्कर थे। इनके पुत्र—

९ श्रीविक्रम। इनके पुत्र—

१० भूविक्रम हुए, जिन्होंने विळन्द नामक स्थानमें पल्लवेन्द्र नरपतिको जीता था। सौ युद्धोंमें जीतनेसे प्राप्त लक्ष्मीका विलास (भोग) करनेसे इनको 'राज-श्रीवल्लभ' भी कहते थे। इनके अनुजका नाम नवकाम था।

इसके पश्चात्— उन कोङ्गणिमहाराजका जिनका दूसरा नाम 'शिवमार' था पौत्र

११ राज-श्रीपुरुष हुआ। इन्हींका द्वितीय नाम 'पृथिवीकोङ्गणिमहाराज' था। ये जब, शक सं० के ६९८ वर्ष बीत जाने पर और अपने राज्यका जब ५० वाँ वर्ष चालू था, अपने विजयस्कन्धावार मान्यपुरमें निवास कर रहे थे, तबः—

मूल मूलसंघमेंसे निकले हुए नन्दिसंघके एरेगित्तूर्-गणके पुलिकल्-गच्छमें चन्द्रनन्दि गुरु हुए। उनके शिष्य कुमारनन्दि मुनिपति, उनके शिष्य कीर्त्तिनन्द्याचार्य, उनके शिष्य विमलचन्द्राचार्य हुए।

१२ इन महर्षिके धर्मोपदेशसे निर्गुन्द युवराज, जिनका पहला नाम 'दुण्डु' था और जो 'बाणकुल' के नाशक प्रतिबुद्ध हुए थे। इनके पुत्र—

१३ पृथिवी-निर्गुन्द-राज हुए। इनका पहला नाम परमगूळ था। इनकी पत्नीका नाम कुन्दाच्चि था। यह सगरकुल-तिलक मरुवर्म्माकी पुत्री थीं और इनकी माता पल्लवाधिराजकी प्रियपुत्री थीं जो मरुवर्म्माकी पत्नी थीं। इसने (कुन्दाच्चिने) श्रीपुरकी उत्तर दिशामें 'लोकतिलक' नामका

जिनमन्दिर बनवाया था। उसकी मरम्मत, नई वृद्धि, देवपूजा, दानधर्म आदिकी प्रवृत्तिके लिये पृथिवी-निर्गुन्द-राजके कहनेसे महाराजाधिराज परमेश्वर श्री-जसहित-देवने निर्गुन्द देशमें आनेवाले 'पोन्नलि' ग्रामका दान, सर्व करों और बाधाओंसे मुक्त करके दिया।

इसके बाद इस लेखमें इस गाँवकी आठ दिशाओंकी सीमा दी हुई है। तथा अन्य क्या-क्या क्षेत्र दानमें दिये गये थे उनकी सूची है। दानके साक्षी कौन-कौन थे, इसका उल्लेख है। तत्पश्चात् मनुके वे प्रसिद्ध चार श्लोक हैं जो बहुत-से शिलालेखोंके अन्तमें पाये जाते हैं। सबसे अन्तमें, इस लेख (शासन) को उत्कीर्ण करनेवाले शिल्पीने अपना नाम 'विश्व-कर्म्माचार्य' दिया है तथा उसी समय उसको भी कुछ भूमिदान किया गया था उसका भी इसमें उल्लेख है।]

[EC, IV, Nagamangala tl. n° 85]

१२२

मण्णे—संस्कृत।

शकवर्ष ७१९=७९७ ई०

[मण्णेमें, शीलवन्त रुद्रय्यके अधिकारके ताम्रपत्रों पर]

(१ ब) स्वस्ति जितं भगवता गत-घन-गगनाभेन पद्मनाभेन श्रीमज्जाह्नवेय-कुलामल-व्योमावभासन-भास्करः स्वखड्गैकप्रहार-खण्डित-महा-शिला-स्तम्भ-लब्ध-बल-पराक्रमो दारुणारि-गणविदारणोपलब्ध-व्रण-विभूषण-भूषितः काण्वायन-सगोत्रः श्रीमत्-**कोङ्गणि-वर्म्म-धर्म्म-महा-धिराजः**, तस्य पुत्रः पितुरन्वागत-गुण-युक्तो विद्या-विनय-विहित-वृत्तः(त्तिः) सम्यक्-प्रजा-पालन-मात्राधिगत-राज्य-प्रयोजनो विद्वत्कवि-काञ्चन-निक-षोपल-भूतो नीतिशास्त्रस्य वक्तृ-प्रयोक्तृ-कुशलो **दत्तक-सूत्र-वृत्तेः** प्रणेता श्रीमान् **माधव-महाधिराजः**, तत्पुत्रः पितृ-पितामह-गुण-युक्तोऽनेकचा-तुर्-दन्त-युद्धावाप्त-चतुरुदधि-सलिलास्वादितयशश्श्रीमद्**दुरिवर्म्म-महा-धिराजः**, तत्पुत्रो द्विज-गुरु-देवता-पूजन-परो नारायण-चरणानुध्यातः

श्रीमान् **विष्णुगोपमहाधिराजः**, तत्पुत्रस् त्र्यम्बक-चरणाम्भोरुह-रजः-पवित्रीकृतोत्तमाङ्गः स्व-भुज-बल-पराक्रम-क्रय-(२ अ)कृ(क्री)तराज्यः कलि-युग-बल-पङ्कावसन्न-धर्म्म-वृषोद्धरण-नित्य-सन्नद्धः श्रीमान् **माधव-महाधि-राजः**, तत्पुत्र [श्र्] श्रीमत्-कदम्ब-कुल-गगन-गभस्तिमालिनः **कृष्णव-र्म्म-महाधिराजस्य** प्रिय-भागिनेयो विद्या-विनयातिशय-परिपूरितान्तरात्मा निरवग्रह-प्रधान-शौर्य्यो विद्वत्सु प्रथम-गण्यः श्रीमान् **कोङ्गणि-महाधि-राजः अविनीत**-नामा, तत्पुत्रो विजृम्भमाणशक्ति-त्रयः अन्दरि-आल-त्तूर्-प्पोरुळरे-पेळ्नगराद्यनेकसमर-मुख-मख-हुत-प्रहत-शूर-पुरुष-पशूप-हार-विघस-विहस्तीकृत-कृतान्ताग्नि-मुखः किरातार्जुनीय-पञ्च-दश-सर्ग-टीकाकारो **दुर्व्विनीत**-नामधेयः, तस्य पुत्रो दुर्द्दान्त-विमर्द्द-विमृदित-विश्वम्भराधिप-भौळि-माला-मकरन्द-पुञ्ज-पिञ्जरीक्रियमाण-चरण-युगलन-लिनो **मुष्कर**-नामधेयः, तस्य पुत्रश्चतुर्द्दश-विद्या-स्थानाधिगत-विमल-मति-र्व्विशेषतोऽनवशेषस्य नीति-शास्त्रस्य वक्तृ (क्तृ)-प्रयोक्तृ-कुशलो रिपु-तिमिर-निकर-निराक[र]णोदय-भास्करः **श्रीविक्रम**-प्रथित-ना[म]धेयः, तस्य पुत्रः अनेक-समर-सम्पादित-विजृ (२ ब) म्भित-द्विरद-रदन-कुलिशाभिघात-वर्ण्ण(व्रण)संरूढ-भास्वद्विजय-लक्षण-लक्ष्मीकृत-विशाल-व-क्षस्थलः समधिगत-सकल-शास्त्रार्थ-तत्त्वस्समाराधित-त्रिवर्गो निरवद्य-चरित[:]प्रतिदिनमभिवर्द्धमान-प्रभावो **भूविक्रम**नामधेयः

अपि च

नाना-हेति-प्रहार-प्रविघटित-भटोरःकवाटोत्थितासृग्-
धारास्वाद-प्रमत्त-द्विप-शतचरण-क्षोद-सम्मर्द्द-भीमे ।
सङ्गामे **पल्लवेन्द्रं** नरपतिमजयद् यो **विळन्दा**भिधाने
राजा **श्रीवल्लभा**ख्यस्समर-शत-जयावाप्त-लक्ष्मी-विलासः ॥

तस्यानुजो नत-नरेन्द्र-किरीट-कोटि-
रत्नार्क-दीधिति-विराजित-पाद-पद्मः ।
लक्ष्म्या स्वयम्वृत-पतिर्न्नव-काम-नामा
शिष्ट-प्रियोऽरि-गण-दारण-गीत-कीर्त्तिः ॥

तस्य **कोङ्गुणि-महाराजस्य शिवमारा**पर-नामधेयस्य पौत्रः समवन-तसमस्त-सामन्त-मुकुट-तट-घटित-बहल-रत्न-विलसदमर-धनुष्-खण्ड-म-ण्डितचरण-नख-मण्डलो नारायण-चरण-निहित-भक्ति[:]शूर-पुरुष-तुरग-नरवारण-घटा-संघट्ट-दारुण-समर-शिरसि भी(निहि)तात्म-कोपो भीम-कोपः प्रकटरति-समय-समनुवर्तन-चतुर-युवति-जन-लोक-धूर्त्तोऽलोक-धूर्त्तः सुदु-र्धरानेक-युद्ध-मूर्द्ध-लब्ध-विजय-सम्पदहित-गज-घटा-केसरी राज-केसरी ।

अपि च

यो गङ्गान्वय-निर्म्मलाम्बर-तल-व्याभासन-प्रोल्लसन्-
मार्त्तण्डोऽरि-भयंकरश्शुभकरस्सन्मार्ग्ग(३ अ) रक्षा-करः ।
सौराज्यं समुपेत्य राजसमितौ राजद्(न्)-गुणैरुत्तमै
राजा श्रीपुरुषश्चिरं विजयते राजन्य-चूड़ामणिः ॥
कामो रामासु चापे दशरथ-तनयो विक्रमे जामदग्न्यः
प्राज्यैश्वर्य्ये बलारिर्बा(ब)हु-महसि रविः स्व-प्र[भुत्]वे धनेशः ।
भूयो विख्यात-शक्तिस्स्फुटतरमखिलप्राण-भाजं विधाता
धात्रा सृष्टः प्रजानां पतिरिति कवयो यं प्रशंसन्ति नित्यम् ॥

स तु प्रतिदिन-प्रवृत्त-महादान-जनित-पुण्याह-घोष-मुखरित-मन्दि-रोदरः श्रीपु[रु]ष-प्रथम-नामधेयः **पृथिवी-कोङ्गणि-[म]हाधिराजः,** तत्पुत्रः प्रताप-विनमित-सकल-महीपाल-मौलि-माला-ललित-चरणारविन्द-युगलो निज-भुज-विराजि-निशित-खड्ग-पट्ट-समाकृष्टानिष्ट धरावल्लभ-

जय-श्री-समालिङ्गितस्समर-मुख-सम्मुखागत-रिपु-नृपति-गज-घटा-कुम्भ-निर्भेदनोच्चलित-रक्त-च्छटा-पात-पाटलित-निज-भुज-स्तम्भः आ-कर्ण्ण-समाकृष्ट-चाप-चक्र-विनिर्मुक्त-नाराच-परम्परा-पात-पातितारति-मण्डलो बहु-समर-समार्ज्जित-जय-पताका-शत-[श]वलित-नभस्-तलः

यस्मिन् प्रयातवति कोप-वशं महीशे
यान्ति क्षणादहित-भूमिभुजो रणाग्रे ।
अन्त्रावली-वलय-भीषणमन्तक (३ ब) स्य
वक्त्रान्तरं क्षतज-कर्द्दम-दुर्निरीक्ष्यम् ॥

स तु शिशिरकर-निर्म्मल-निज-यशो-राशि-विशदीकृत-दशाशा-चक्र[ः] समस्त-चक्रवर्त्ति-लक्षणोपलक्षितो निरपेक्षा-परोपकार-सम्पादनैक-व्यसनः प्रवर्त्तित-न्याय-बल-समुन्मूलित-कलि-काल-विलसितो निपुण-नीति-प्रयोगापहसित-बृहस्पतिः कु-नृपति-कदम्बक-कपाट-कोटि-विघट्टित-धर्म्मावलं ····न····शिलास्तम्भायमान-चरितः सतत-प्रवृत्त-दान-सन्तर्प्पित-द्विजाति-लोकः ।

प्रोन्मूलित-विकारेण सर्व्व-लोकोपकारिणा ।
यस्य दानेन दिङ्-नाग-दान-धाराप्यधःकृता ॥

अपि च

जटानां संघातैरिह भुवि कृतोऽनून-विपदाम्
कलानामाधारो बुध-जन-हितः पालन-परः ।
गुणानां शुद्धानामपि नियतमुत्पत्ति-भवनम्
नृपाणां नेता····कविरिति मतः काव्य-कुशलः ॥

दुर्व्व(दुरव)गाह-फणिसुत-मत-पारावार-पारदृश्वा प्रमाण-शास्त्र-शाण-निशातीकृत-धीर-धिषणः सामज-तन्त्र-तत्त्वावबोध-विमदीकृत-भु(बु)धो

हस्तिनी-(व)क्त्रोद्भव-यति-प्रवर-मतावबोधन-गभीर-मतिर्व्विद्वान्-मति-वितति-विकल्प·····विचार-विचक्षणोऽङ्गीकृ[त]-तुरङ्गमागम-प्रयोग-परिणतो धनु-र्व्विद्याम्भोरुह-वन-गहन-विकासित-विदग्ध-म(४ अ)रीचि-माली निज-निर्म्मित-गज-मत-कल्पनानल्प-चेता विराजित-सेतु-बन्धनो नन्दित-विपश्चिन्मण्डलस्सकल-नाटक-विषय-सन्धि-सन्ध्यङ्गादि-योजना-चतुरो निरुपम-निज-रूप-निर्जित-मकरध्वजो मकरध्वज-गुरु-चरण-सरोज-विनमन-पवित्री-कृतोत्तमाङ्गो **मुदुकुन्दूर्**-न्नाम-ग्रामोपविष्ट-**राष्ट्रकूट-चालुक्य-हैहय**-प्रमुख-प्रवीर-सनाथ-वल्लभ-सैन्य-विजय-विख्यापित-प्रभावः ।

अपि च ।

घोराश्वीयं समन्तात् प्रबलमुपगत-व्याप्त-दिक्-चक्रवालम्
निर्ज्जित्यानेक-संख्यैर्न्निशित-निज-भुजोन्मुक्त-नाराच-जालैः ।
देवो यः प्राज्य-तेजस् तिमिरमिव महत्-तीव्रभानुर्म्मयूखैर्
द्रुव्वारोदार-पातैरुदयमभिलषन् स्वन्निवेशं विवेश ॥

स तु हरिरिव सतत-सम्भावित-द्विज-पतिः सहस्रकिरण इव प्रति-दिवसोचितोदयः भुजङ्गलोक इव विगत-भयो (र्) आत्माकर इवास्पृष्ट-कलङ्को दुर्य्योधनोऽप्यभिनन्दितार्ज्जुन-गुणो वाहिनी-पतिरप्यजडाशयः शीतकरोऽप्यनालिङ्गित-मलिन-भावो राष्ट्रकूट-पल्लवान्वय-तिलकाभ्यां मूर्द्धाभिषिक्त-**गोविन्द-राज-नन्दि-वर्म्मा**भिधेयाभ्यां समनुष्ठित-राज्याभिषेकाभ्यां निज-कर-घट्टित-पट्ट-विभूषित-ललाट-पट्टो विख्या[त]-विमल-गङ्गान्वय-नभस्-तल-गभस्तिमाली **कोङ्गणि-महाराजाधिराज-परमेश्वर-श्री-शिव-मार-देवः** (४ ब) ॥ तत्पुत्रो निज-भुज-निहित-निशात-हेति-पात-पातितारति-वर्गो वर्ग्ग-द्वयोपार्ज्जनार्ज्जितोर्ज्जित-यशस्सन्तान-सन्तर्प्पित-स-

मस्त-जन-हृदयः प्रभवत्कलि-काल····विवर्द्धित-कलङ्कि····लाय····कल्प-कल्याण-चरितः स्ववंश-विशद-वियदंशुमाली समस्त-नीति-शास्त्र-प्रयोग-प्रवीणाग्रगण्यस्तुरङ्गमारोहण-नैपुण्य-प्रीणित-क्षोणीपति-सुत-सहस्र-लब्ध-साम-ध्वनिरनेक-सङ्गर-रङ्ग-सङ्गमाङ्गीकृत-जय-श्री-समालिङ्गित-भुजङ्ग-भोगाभ-भीम-भुज-दण्डः

यस्मिन् शासति सत्य-धाम्नि विमले राजन्वती मेदिनी
यस्मि····र्य्यमुपेत्य बृंहित-बलो धर्म्मोऽधिकं जृम्भते ।
यस्यैवाभय-दायिनोऽतिदयिता दोश्शालिनश्शाश्वती
लक्ष्मीर्यत्र यशो-निधौ पतिमती जाता जगद्वल्लभा ॥

स तु पितामह इवानेक-राजहंस-संसेवितः पद्मावासश्च मधुमथन इव त्रिलोकाधिक-विक्रमाक्षिप्त-बलि-रिपुरहीन-स्थितिरविश्च धूर्जटिरिवाविनश्वरेश्वर-भावो वीर-भद्रश्च कार्त्तिकेय इव सकल-जगदुदीरित-स्वामि-शब्दश्शक्ति-सम्पन्नश्च महा-मेरुरिव स्व-महिमाधःकृत-महीभृन्मण्डलो महासत्त्वश्च ।

अपि च ।

मन्त्रादि-(षोड) (५ अ) षोडश-महीश-गुणानुरागो
यं प्राप्य विस्मृति-पदं ज [ग] तो जगाम ।
यस्य प्रतापदहनोऽहित-बुद्धि-वार्द्धाव्
और्व्वायते नरपतेरतिदूरतोऽपि ॥

यश्च समर-शिरसि····कलत्रे च निज-जने मित्रायते रिपु-तिमिर-निचये च अनेक-प्रकारण-रणकार्दितान्तःकरणानां शरणायते सम्पदां च अतिप्रभूत-मति-निकेत-तमस्-तति-तिरस्कृतौ प्रद्योतायते····खिल-जगदनुल्लंघिताज्ञा-सम्पत्तौ च सकल-कुवलय-लोचनानन्दकरतायां द्विजेशायते हरि-वाहन-निहित-चित्तत्वे च ।

अपि च ।

यस्यैकस्यापि सर्व्वं जगदपि स-रुषो नाग्रतस् स्थातुमीष्टे
दित्सा-सम्भूत-बुद्धेरपि नव निधयो यस्य नालं नृपस्य ।
जिह्रे तीव्राभिमानात् कपट-विजयिनां यद्-धृतेर्न्नाकधाम्नाम्
[रा] ज्ञां विज्ञातकीर्ति [स्स] सकल-जगतां नन्दनो **मारसिंहः** ॥

यश्च सतत-सम्पादित-कमलानन्दोऽप्यप्रचण्डकरः पुण्य-जन-सत्त्व-समेतोऽप्यनृशंस-मानसः मत्त-मातङ्ग-स्कन्ध-लालितोऽप्यति-शुचि-स्वभावः प्रिय-धनुरप्यमार्ग्गणः समनुष्ठित-दण्ड-नीतिरप्यदण्डक्रम-गतिः ॥

अपि च ।

धूसरीकुरुते यस्य चरणाम्भोज-जं रजः ।
प्रणतानन्त-सामन्त-चूडामणि-मधुव्रजम् ॥

तेन **लो** (५ ब) **क-त्रिनेत्रा**पर-नामधेयेन समधिगत-यौवराज्य-पदेन भगवत्सहस्र-किरण-चरण-नलिन-षट्चरणायमान-मानसेन ॥ तस्मिंश्च प्रसाधिताशेष-सामन्त·····अखण्डं **गङ्ग-मण्डल**मनुशासति श्री**मारसिंहा**भिधाने आसीत् समस्त-सामन्त-सेनाधिपतिः परमार्हतः परम-धार्म्मिकः मन्त्र-प्रभूत्साह-शक्ति-सम्पन्नः **श्रीविजयो** नाम यश्च सहस्रदीधितिरिव तिरोहिताखिल-पर-तेजः पर-तेजः-प्रसरोऽपि असन्तापित-भूतलः सुनाशीर इवाखण्डित-सकल-जनाज्ञोऽपि अगोत्र-भेदन-करः गुह इव शक्ति-समुत्सारिता-वर्ग्गोऽपि अकृत-बल-भावःशिशिरगभस्तिरिव प्रह्लादनोद्योतनसमर्त्थोऽपि अदोषाश्रित-विग्रहः वारिराशिरिव अपरिमित-सत्व-समाश्रयोऽपि अपङ्क-मल-गृहीतः विनतानंद [न] इव अतिदूर-द [र्श] नोऽपि अपिशिताशनः शतक्रतुरिव बुध-गुरु-मित्र-परिवृतोऽपि न [प] र-दार-रति-शप्तः झषकेतन इव स्ववशीकृत-सकल-जनोऽपि अप्र (प)

हृत-बलाबलो-तप....यश्च अमृतमयो भृत्यानां सुखमयो मित्राणां सुधामयो रामाणामुत्साहमयः प्रजानां विनयमयो गुरूणां नयमूस्ख (६ अ) लद्-वृत्तीनां अग्रणी रसिकानां स्रष्टा काव्य-रचनानां उपदेष्टा नयानां द्रष्टा स्वामि-कार्य्याणां विद्वेष्टा कृत-दोषाणां यष्टा महा-मखानां परिमार्ष्टा पापानां प्रष्टा निर्म्माण-हेतूनां परिकृष्टा श्रितागसाम् ।

अपि च ।

उदन्वानिव गाम्भीर्य्ये विवस्वानिव तेजसि ।
शशलक्ष्मेव लावण्ये नभस्वानिव यो बले ॥
मनोभूरिव सौरूप्ये मघवानिव सम्पदि ।
सुरमन्त्रीव शास्त्रार्थे उशनेव च यो नये ॥
ग्रामे पुरे नदी-तीरे गिरौ द्वीपे सरोऽन्तिके ।
प्रावर्त्तयत् स्व-कीर्त्याभां योऽनेकं वसतिं प्रभुः ॥
स **मान्यनगरे** श्रीमान् **श्रीविजयो**ऽकार [य] च्छुभम् ।
जिनेन्द्र-भवनं तुङ्गं निर्म्मलं स्व-महस्-समम् ॥

तस्य च प्रसाधिताशेष-सामन्त-चन्द्रस्य श्री-**मारसिंह**स्यानुज्ञया **श्रीविजयो** महानुभावः **किषु-वेक्कूर**-ग्राममादाय **मान्यपुर**-विनिर्म्मिताय भगवदर्हदायतनाय अदादिति तस्य च ग्रामस्य (**यहाँ सीमाओंकी विस्तृत चर्चा आती है**) ।

अपि च ।

आसीद(त्)-**तोरणाचार्य्यः** कोण्डकुन्दान्वयोद्भवः
स तै [द] द्विषये धीमान् **शालमली**ग्राममाश्रितः ॥
निराकृततमोऽरातिः स्थापयन् सत्पथे जनान् ।
स्वतेजोद्द्योतित-क्षोणिः चण्डार्च्चिरिव यो बभौ ॥

तस्याभूत् **पुष्पनन्दी**ति शिष्यो विद्वान् गणाग्रणीः ।
तच्छिष्यश्च **प्रभाचन्द्रः** तस्येयं वसतिः कृता ॥

(३ पंक्तियोंमें दानकी चर्चा है)

इदष **शक-वर्ष एळ्नूरा पत्तोम्भत्तु वर्षमुं मूषु तिङ्गळुमाषाढ-शुक्ल-पक्षदा पञ्चमियुमुत्तराभाद्रपतेमुं सोमवारमुं** शासनं निर्मितं । अस्य दानस्य साक्षिणः **षण्णवति-सहस्र**-विषय-प्रकृतयः योऽस्यापहर्त्ता लोभान्मोहात् प्रमादेन वा स पञ्चभिर्महद्भिः पातकैस्संयुक्तो भवति यो रक्षति स पुण्यवान् भवति

अपि चात्र मनु-गीताः श्लोकाः

स्वदत्तां पर-दत्तां वा यो हरेत वसुंधराम् ।
(७ अ) षष्टि-वर्ष-सहस्राणि विष्ठा [यां जा] यते कृमिः ।
स्वं दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम् ।
दानं वा पालनं वेति दानाच्छ्रेयोऽनुपालनम् ॥
बहुभिर्वसुधा भुक्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिः तस्य तस्य तदा फलम् ॥
ब्रह्मस्वं तु विषं घोरं न विषं विषमुच्यते ।
विषमेकाकिनं हन्ति देव-स्वं पुत्र-पौत्रकम् ॥

सर्व्व-कलाधारभूत-चित्र-कलाभिज्ञेय-**विश्वकर्म्माचार्य्येण**दं शासनं लिखितं चतुष्कण्डुक-व्रीहि-बीजावाप-क्षेत्रं द्वि-कण्डुक-कङ्गु-क्षेत्रं तदपि देव-भोगमिति रक्षणीयम् ॥

[जाह्नवी (गङ्ग)-कुलके स्वच्छ आकाशमें चमकते हुए सूर्य; काण्वायन-सगोत्रके

(१) श्रीमत्-कोङ्गणिवर्म-धर्म-महाधिराज थे ।
(२) उनके पुत्र श्रीमान् माधव-महाधिराज थे ।

(३) उनके पुत्र श्रीमद् हरिवर्म-महाधिराज थे।

(४) ,, ,, श्रीमान् विष्णुगोप-महाधिराज थे।

(५) ,, ,, ,, माधव-महाधिराज थे।

(६) उनके पुत्र, जो कदम्ब-कुलवंशीय कृष्णवर्म्म-महाधिराजकी प्रिय बहिनके पुत्र थे, अविनीत नामके श्रीमान् कोङ्गणि-महाधिराज थे।

(७) उनके पुत्र दुर्विनीत थे। इन्होंने अन्दरि, आलत्तूर, पोरुलणे, पेळ्नगर और दूसरे स्थानोंके युद्धोंको जीता था। इन्होंने किरातार्ज्जुनीय के १५ सर्गोंपर टीका की थी।

(८) इनके पुत्र मुष्कर थे।

(९) उनके पुत्र श्रीविक्रम थे, ये चौदहों विद्याओंमें पारङ्गत थे।

(१०) उनके पुत्र भूविक्रम थे। इन्होंने विळन्दकी भयानक लड़ाईमें राजा पल्लवेन्द्रको जीता था, और सौ लड़ाइयोंमें विजय लाभ करनेसे इनको 'राजश्रीवल्लभ' भी कहते थे।

(११) उनका छोटा भाई नव-काम था।

(१२) शिवमार-कोङ्गणि-महाराजका नाती श्रीपुरुष था, उन्हें पृथिवी-कोङ्गणि-महाधिराज भी कहते थे।

(१३) उनके पुत्र, प्रसिद्ध गंगवंशके स्वच्छ आकाशके सूर्य, कोङ्गणि-महाराजाधिराज परमेश्वर श्री-शिवमार-देव थे। इनकी बहुत-सी प्रशंसाका वर्णन है।

(१४) उनके पुत्र, मारसिंह थे।

जब वे अखण्ड गङ्ग-मण्डलपर राज्य कर रहे थे;-उनका एक श्रीविजय नामका सेनापति था। उसकी प्रशंसा। उसने मान्य-नगरमें एक शुभ, विशाल जिनमन्दिर बनवाया। उसे श्रीमारसिंहसे किषु-वेक्कुरु गाँव मिला था, वह उसने इसी अर्हत्-मन्दिरको भेंट कर दिया। इस गाँवकी सीमायें।

शाल्मली गाँवमें रहनेवाले, कोण्डकुन्दान्वयके तोरणाचार्य्य थे। उनके शिष्य पद्मनन्दि थे। उनके शिष्य प्रभाचन्द्र थे, जिन्होंने अपना आवास यहीं बना लिया था। जडियके तालाबोंकी नीचेकी जो जमीनें उनको दी गई थीं उनकी विगत। यह शासन (लेख) शक वर्ष ७१९ के ३ महीने बाद, आषाढ़ शुक्ला पञ्चमी, उत्तरभाद्रपद, सोमवारको निकला था।

इस दानके साक्षी–९६००० के विद्यमान अफसर (अधिकारी गण)। वे ही श्रापात्मक श्लोक ।

विश्वकर्म्माचार्य्यने इस शासनको लिखा था । प्रभाचन्द्र देवको दी गई भूमिकी विगत ।]

[EC, IX, Nelamangala, tl., n° 60]

१२३

मन्ने—संस्कृत ।

शक ७२४=८०२ ई०

[मन्नेमें, शानभोग नरहरियप्पके अधिकारके ताम्रपत्रोंपर]

(१ ब) स वोऽव्याद् वेधसां धाम यन्नाभि-कमलं कृतम् ।
हरश्च यस्य कान्तेन्दु-कलया कमलङ्कृतम् ॥
भूयोऽभवद् बृहदुरुस्थल-राजमान-
श्री-कौस्तुभायत-करैरुपगूढ़-कण्ठः ।
सत्यान्वितो विपुल-बाहु-विनिर्जितारि-
चक्रोऽप्यकृष्ण-चरितो भुवि **कृष्ण-राजः** ॥

पक्ष-च्छेद-भयाश्रिताखिळ-महा-भूभृत्-कुल-भ्राजितात्
दुर्ल्लङ्घ्यादपरैरनेक-विपुल-भ्राजिष्णु-रत्नान्वितात् ।
य**श्चालुक्यकुला**दनून-विबुधा[····]श्रया [द्] वारिधेः
लक्ष्मीं मन्दरवत् स-लीलमचिरादाकृष्टवान् **वल्लभः** ॥
तस्याभूत् तनयः प्रता [प]-विसरैराक्रान्त-दिङ्-मण्डलश्
चण्डांशोस्सदृशोऽप्य-चण्ड-करतःप्रह्लादित-क्ष्माधरो ।
धोरो धैर्य्य-धनो विपक्ष-वनिता-वक्त्राम्बुज-श्री-हरो
हारीकृत्य यशो यदीयमनिशं दिङ्-नायिकाभिर्धृतम् ॥

ज्येष्ठोल्लंघन-जातयाप्यमलया लक्ष्म्या समेतोऽपि सन्
योऽभून्निर्म्मल-मण्डल-स्थिति-युतो दोषाकरो न क्वचित् ।
कर्णाधः-कृत-दान-सन्तति- (२ अ) भृतो यस्यान्य-दानाधिकम्
दानं वीक्ष्य सु-लज्जिता इव दिशां प्रान्ते स्थिता दिग्-गजाः ॥
अन्यैर्न्न जातु विजितं गुरु-शक्ति-सारं
आक्रान्त-भूतलमनन्य-समान-मानम् ।
येनेह बद्धमवलोक्य चिराय **गङ्गान्**
दूरे स्व-निग्रह-भियेव कलिः प्रयातः ॥
एकत्रात्म-बलेन वारिनिधिनाप्यन्यत्र रुध्वा घनान्
निष्कृष्टासि-भटोद्धतेन विहरद्-ग्राहातिभीमेन च ।
मातङ्गान् मद-वारिनिर्झर-मुचः प्राप्यानतात् **पल्लवात्**
तच्चित्रं मद-लेशमप्यनुदिनं यस्स्पृष्टवान् न क्वचित् ॥
हेला-स्वीकृत-**गौड**-राज्य-कमलान् चान्तःप्रविश्याचिराद्
उन्मार्गे मरु-मध्यम-प्रतिबलैर्यो **वत्सराजं** बलैः ।
गौडीयं शरदिन्दु-पाद-धवल-च्छत्र-द्वयं केवलम्
तस्मादाहृत-तद्-यशोऽपि ककुभां प्रान्ते स्थितं तत्-क्षणात् ॥
लब्ध-प्रतिष्ठमचिराय कलिं सुदूरम्
उत्सार्य्य शुद्ध-चरितैर्धरणी-तलस्य ।
कृत्वा पुनः कृत-युग-श्रियमप्यशेषम्
चित्रं कथं **निरुपमः** कलि-वल्लभोऽभूत् ॥
प्राभू-(२ ब)द् धर्म-परात् ततो निरुपमादिन्दुर्य्यथा वारिधेः
शुद्धात्मा परमेश्वरोन्नत-शिरस्-संसक्त-पादस्तथा ।
पद्मानन्दकरः प्रताप-सहितो नित्योदयस्सोन्नतेः
पूर्व्वाद्रेरिव भानुमानभिमतो **गोविन्दराजः** सताम् ॥

यस्मिन् सर्व्व-गुणाश्रये क्षितिपतौ श्री-**राष्ट्रकूटा**न्वयो
जाते **यादव**-वंशवन्मधुरिपावासीद् अलङ्घ्यः परैः ।
दृष्ट्वा सावधयः कृतास्सु-सदृशाः दानेन येनोद्धताः
युक्ताहार-विभूषिताः स्फुटमिति प्रत्यर्थिनोऽप्यर्थिनः ॥
यस्याकारमनानुषं त्रिभुवन-व्यापत्ति-रक्षोचितम्
कृष्णस्येव निरीक्ष्य यच्छति पदं यद्याधिपत्य भुवः ।
आस्तां तात तवेयमप्रतिहता दत्ता त्वया कण्ठिका
किन्त्वाज्ञैव मया धृतेति पितरं युक्तं स तत्राभ्यधात् ॥
तस्मिन् स्वर्ग्ग-विभूषणाय जनने याते यशश्शेषताम्
एकीभूय समुद्यतान् वसुमती-संहारमाधित्सया ।
वि-च्छायान् सहसा व्यधत्त नृपतीनेकोऽपि यो द्वादश
ख्यातानप्यधिक-प्रताप-विसरैस्संवर्त्त (३ अ) कोल्कानिव ॥
येनात्यन्त-दयालुनोग्र-निगल-क्लेशादपास्यानतस्
स्वं देशं गमितोऽपि दर्प्प-विसरद् यः प्रा [····]कूल्ये स्थितः ।
लीला-भ्रू-कुटिले ललाट-फलके यावच्च नालक्ष्यते
विक्षेपेण विजित्य तावदचिरादाबद्ध-गङ्गः पुनः ॥
सन्धायासि शिलीमुखान् स्व-समयात् बाणासनस्योपरि
प्राप्तं वर्द्धित-बन्धु-जीव-विभवं पद्माभिवृद्ध्यान्वितम् ।
सर्व्वं क्षेत्रमुदीक्ष्य यं शरद्-ऋतुं पर्ज्जन्यवद् **गूर्ज्जरो**
नष्टः क्वापि भयात् तथापि समयं स्वप्नेऽप्यपश्यन्····॥
यत्पादानति-मात्र····क-शरणानालोक्य लक्ष्मी-धिया
दूरान् **मालव**-नायको नय-परो यत्रातिबद्धाञ्जलिः ।
